ध्रु (Anit) 1 P. गतौ । to go, to flow, to run, to retreat, to melt, to attack, to rush Act ध्रवति, दुध्राव, दुध्रोथ, ध्रोतास्मि, ध्रोष्यति, अदुध्रुवत्, ध्रूयास्तं, Caus ध्रावयति only अदुध्रवत् or अदिध्रवत्, Desid दुध्रूषति (दिध्रावयिषति or दुध्रावयिषति is the Desid. of the Caus form).

ध्रेक् (ध्रेकृ–Set) 1 A. शब्दोत्साहयोः । to sound, to show joy; to be exhilarated Caus Aor अदिध्रेकत्—त.

ध्रै (Anit) 1 P. स्वप्ने । to sleep, (mostly with नि) Bene. ध्रायात् or ध्रेयात्, Caus. ध्रापयति—ते, अदिध्रपत्—त Deri. ध्राण, ध्रात्वा, ध्रातुं, निद्राय

ध्वृ (Anit) 1 P. संवरणे अंगीकृतौच । to cover, to appropriate.

धण् } (Set) 1 P शब्दे । to sound, Aor. अधणीत् or अधाणीत्,
धन् } अधनीत् or अधानीत्.

धन्व् (धवि–Set) 1 P गतौ । to go.

धाव् (धावु—Set) I U. गति-शुद्धयोः । to run, to flow, to cleanse, to wash Caus, Aor अदीधवत् त Deri. धावित or धौत, धावितुं, धावित्वा or धौत्वा.

धिक्ष् (धिक्ष—Set) 1 A. संदीपन–क्लेशन–जीवनेषु । to kindle, to be harassed or weary, to live.

धिन्व् (धिवि—Set) 1 P. प्रीणने । to please, to delight. (This root is conjugated as धि of the 5th conjugation) Act धिनोति, धिन्वंति, धिनुवः–धिन्वः अधिनोत्, अधिनवं, धिनोतु, धिनु, धिनवाम, धिनुयां.

धुक्ष् (धुक्ष–Set) I A संदीपन–क्लेशन–जीवनेषु । to kindle, to be harassed or weary, to live.

धुर्व् (धुर्वी—Set) 1 P हिंसायाम् । to injure, hurt or kill, धु-धूर्वति, Deri धूर्त.

धू (Set) 1 U कंपने । to shake, to excite, धवति-ते. Caus धूनयति, also धावयति, अदूधुनत् , also अदूधवत् .

धूप् (Set) 1 P संतापे । to heat, to fumigate, to perfume, to be heated, Act धूपायति, दुधूप or धूपायांचकार, दुधूपिथ or धूपायांचकर्थ, धूपितास्मि or धूपायितास्मि, धूपिष्यति or धूपायिष्यति, अधूपिष्यत् or अधूपायिष्यत् , अधूपीत् or अधूपायीत्, धूप्यासं or धूपाय्यासं Pass धूप्यते or धूपाय्यते, धूपिष्यते or धूपायिष्यते, अधूपि or अधूपायि. Caus. धूपयति-ते or धूपाययति—ते, अदूधुपत् —त or अदुधूपायत्—त Desid. दुधूपिषति or दुधूपायिषति Deri. धूपित or धूपायित, धूपितु or धूपायितुं, धूपित्वा or धूपायित्वा, दुधूप्वस् or धूपायांचकृवस् .

धृ (धृ-ञ्-Anit) 1 U धारणे । to hold, to support, to possess, to keep, to seize, to place, धरति--ते, Bene. ध्रियासं—धृषीय, Pass ध्रीयते, Caus धारयति-ते, अदीधरत्-त.

धृज् { Set } 1 P. गतौ । to go.
धृञ्ज् { धृजि–Set }

धृष् (Set) 1 P प्रसहने । to come together, to hurt or injure, to offend.

धे (धे–ट्–Anit) 1 P. पाने । to suck, to drink, to draw, Act. धयति—दधौ, दधिथ, दधाथ, धातास्मि, धास्यति, अधात् or अदधत् or अधासीत् , धेयासं, Pass धीयते, धास्यते or धायिष्यते, अधायि, Caus धापयते, अदीधपत, Desid धित्सति, Deri. धीत, धातुं, धीत्वा, संधाय.

धोर् (धोर्ऋ–Set) 1 P गतिचातुर्ये । to go quickly, to run, to trot; to be skilful. Caus Aor. अदुधोरत्-त.

ध्मा (Anit) 1 P शद्वाग्निसंयोगयोः । to blow, to breathe out, to produce sound by blowing, to blow a fire, to manufacture by blowing Act धमति, अधमत्, धमतु, धमेयं, दध्मौ, ध्मातास्मि, ध्मास्यति, अध्मास्यत्, अध्मासीत् , ध्मायासं or ध्मेयासं, Caus.

ध्मापयति-ते, अदिध्मपत्-त, Desid. दिध्मासति, Deri आध्माय, धमत्, ध्मास्यत् दध्मिवस्

ध्यै (Anit) 1 P चिन्तायाम् । to think of, to meditate, to recollect Act ध्यायति, अध्यायत्, दध्यौ, दध्याथ or दध्यिथ, ध्यातास्मि, ध्यास्यति, अध्यास्यत्, अध्यासीत्, ध्यायासं or ध्येयासं Pass. ध्यायते, ध्यास्यते or ध्यायिष्यते, अध्यायि, Caus ध्यापयति-ते, अदिध्यपत्—त, Desid. दिध्यासति, Deri. ध्यात, ध्यातुं, ध्यात्वा, अनुध्याय, ध्यायत्, ध्यास्यत्, दध्यिवस्.

ध्रज् (Set) 1 P गतौ । to go, Aor. अध्रजीत् or अध्राजीत्.

ध्रंज् (ध्रजि-Set) 1 P गतौ । to go.

ध्रण् (Set) 1 P, शब्दे । to sound as a drum or other instrument Aor अध्रणीत् or अध्राणीत्.

ध्रस् (Set) 1 P उञ्छे to glean, Aor. अध्रसीत् or अध्रासीत्.

ध्राख् (ध्राखृ-Set) 1 P. शोषणालमर्थयोः । to be dry, to be able. Caus Aor अदध्राखत्-त

ध्राघ् (ध्राघृ—Set) 1 A सामर्थ्ये । to be able or competent. Caus Aor. अदध्राघत्-त.

ध्रांक्ष् (ध्राक्षि—Set) 1 P. काङ्क्षायाम् घोरवासितेच । to desire, to caw; to crow.

ध्राड् (ध्राडृ—Set) 1 A. विशरणे । to divide, to split, Caus. Aor. अदध्राडत्—त.

ध्रिज् (Set) 1 P. गतौ to go.

ध्रु (Anit) 1 P स्थैर्ये । to be firm. ध्रवति.

ध्रेक् (ध्रेकृ–Set) 1 A. शब्दोत्साहयो । to sound; to be filled with joy Caus Aor अदिध्रेकत्-त.

ध्रै (Anit) 1 P. तृप्तौ । to be pleased. Bene. ध्रायात, ध्रेयात्.

ध्वज् (Set) 1 P गतौ । to go, Aor. अध्वजीत्, अध्वाजीत्

ध्वंज् (ध्वजि)-Set 1 P. गतौ । to go.

ध्वण् (Set) 1 P. शब्दे । to sound; Aor. अध्वणीत्ः अध्वाणीत्.

ध्वन् (Set) 1 P. शब्दे to sound; Caus to ring (a bell) घंटां ध्वनयति—ते to cause, to articulate indistinctly ध्वानयति—ते (अस्पष्टाक्षरमुच्चारयतीत्यर्थः) P P. ध्वनित, ध्वान्तं (darkness)

ध्वंस् (ध्वंसु-Set) 1 A. अवस्रंसने गतौच । to fall down, to perish; to go, Deri ध्वस्त. ध्वंसित्वा or ध्वस्त्वा विध्वस्य, ध्वंसितुं.

ध्वांक्ष् (ध्वाक्षि-Set) 1 P. कांक्षायांघोरवासितेच । to desire; to caw; to crow.

ध्वृ (Anit) 1 P. हूर्च्छने । to bend, to kill.

नक्ष् (णक्ष-Set) 1 P गतौ । to go. Aor. अनक्षीत्.

नख् (णख-Set) 1 P गतौ । to go. Aor. अनखीत् or अनाखीत्.

नंख् (णखि-Set) 1 P. गतौ । to go.

नट् (णट-Set) 1 P. नृतौ नाट्येच । to dance, to act (as a dramatic part) Aor अनटीत् or अनाटीत्. Caus नटयति-ते. also नाटयति-ते in the sense of 'to act' अनीनटत्-त. Pass Aor. अनटि, अनाटि

नद् (णद-Set) 1 P. शब्दे । to sound, to roar, to thunder; Aor अनदीत् or अनादीत्, Caus नादयति—ते. Deri नाद, प्रणाद.

नंद् (टुनदि—Set) 1 P. समृद्धौ । to be glad or satisfied.

नभ् (णभ—Set) 1 A. हिंसायामभावेपि । to destroy, to perish.

नम् (णम-Anit) 1 P प्रह्वत्वे शब्देच । to salute, to sink, to bend; to sound; नमति, ननाम, नेमिथ or ननंथ, नंतास्मि, नंस्यति, अनंस्यत्, अनंसीत्, नम्यासं Pass नम्यते, नस्यते, अनामि also अनंस्त, अनसि, Caus नमयति-ते or नामयति-ते, (but with any preposition नमयति-ते as उन्नमयति-ते), अनीनमत्-त, De-id निनंसति Deri नत, नंतव्य, नम्य, नंतुं, नत्वा, विनम्य or विनत्य, नमत, नंस्यत्, नेमिवस्.

नय् (णय-Set) 1 A गतौ । to go.

नर्द् (Set) 1 P. शब्दे । to sound, to roar.

नल् (णल-Set) 1 P. गंधेबंधनेच । to smell, to bind.

नस् (णस्–Set) 1 A कौटिल्ये । to be crooked.

नाथ् { नाथृ } (Set) 1 P याचोपतापैश्वर्याशीःषु to ask; to harass;
नाध् { नाधृ } to be master, to bless (always A in the last sense). Caus. Aor अननाथत्–त, अननाधत्–त.

नास् (णासृ–Set) 1 A शब्दे । to sound; Caus. Aor. अननासत्–त.

निक्ष् (णिक्ष–Set) 1 P चुंबने । to kiss.

निद् (णिदृ–Set) 1 U कुत्सा—संनिकर्षयोः । to ridicule, to reach; Caus Aor अनिनेदत्–त.

निंद् (णिदि–Set) 1 P कुत्सायां । to blame, to censure, to condemn.

निन्व् (णिवि–Set) 1 P. सेचने–सेवने च । to sprinkle, to attend.

निश् (णिश–Set) 1 P समाधौ । to meditate upon,

निष् (णिष–Set) 1 P सेचने । to sprinkle, to moisten,

नी (णी–ञ्–Anit) 1 U. प्रापणे । to lead, to carry, to bring; to pass, to spend, to trace, Act नयति–ते, निनाय–निन्ये, निनेथ or निनयिथ-निन्यिषे, नेतास्मि-ह, नेष्यति ते, अनेष्यत्–त, अनैषीत्—अनेष्ट. नीयासं–नेषीय, Pass नीयते, नेष्यते or नायिष्यते, अनायि, Caus. नाययति–ते, अनीनयत् , Desid निनीषति–ते, Deri नीत, नेतुं, नीत्वा.

नील् (णील–Set) 1 P वर्णे । to be of a dark colour, to dye dark.

नीव् (णीव–Set) 1 P स्थौल्ये । to become fat

नृ (Set) नये । to carry; नरति.

नेद् (णेदृ–Set) 1 U कुत्सासन्निकर्षयो to censure, to be near. Caus. Aor अनिनेदत्–त.

नेष् (णेषृ–Set) 1 A गतौ । to go, Caus. Aor अनिनेषत्–त.

पक्ष् (Set) 1 P परिग्रहे । to seize, to accept, to take aside.

पच् (डु–पचँ–ष्—Anit) 1 U. पाके । to cook, to bake, to burn; to digest, to ripen, to develop, (A. when meaning to cook for oneself) Act पपाच, पेचे, पेचिथ or पपक्थ, पेचिषे, पक्तास्मि–हे, पक्ष्यति–ते, अपक्ष्यत्–त, अपाक्षीत् अपक्त, पच्यासं, पक्षीय, Pass. पच्यते, पक्ष्यते, अपाच, अपाक्षि, Caus. पाचयति—ते, अपीपचत्—त,

Desid पिपक्षति-ते, Deri. पक्व, पाक्य, पक्तुं, पक्त्वा, पक्त्रिम (ripened, matured, cooked)

पंच् (पचि-Set) 1 A. व्यक्तीकरणे । to make clear.

पट् (Set) 1 P. गतौ । to go Aor अपटीत् or अपाटीत्.

पठ् (Set) 1 P. व्यक्तायांवाचि, लिखिताक्षरवाचनेच । to declare, to mention, to cite, to study, to read, to recite, Aor अपठीत् or अपाठीत्. Caus पाठयति-ते.

पण् (पण-Set) 1 A. व्यवहारे । to transact business, to deal in, to barter, to bet, to stake,

पण् / पन् { Set } 1 P. (A. when without आय्) स्तुतौ । to praise, पणायति, अपणायत्, पणायतु, पणायेयं, पणायांचकार or पेणे, पणायितास्मि or पणिताहे, पणायिष्यति or पणिष्यते. अपणायिष्यत् or अपणिष्यत्, अपणायीत् or अपणिष्ट, पणाय्यासं or पणिषीय. Pass पणाय्यते or पण्यते, अपणायि, अपाणि, or Caus. पणाययति-ते or पणायति—ते, Desid पिपणायिषति or पिपणिषते. Deri पणायित or पणित, पणायितुं or पणितुं, पणायित्वा or पणित्वा.

पंड् (पडि-Set) 1 A गतौ । to go.

पत् (पत्लृ-Set) 1 P. गतौ । to fall, to fly, to alight, to sink, to be degraded, to attack. Aor. अपप्तत्, Desid. पिपतिषति or पित्सति.

पृथ् (पृथे-Set) 1 P. गतौ । to go, Aor. अपर्थीत्

पय् (पय—Set) 1 A. गतौ । to go.

पर्द् (पर्द—Set) 1 A कुत्सिते शब्दे । to break wind.

पय् / पव् { Set } 1 P. गतौ । to go.

पर्व् (Set) 1 P पूरणे । to fill.

पल् (Set) 1 P. गतौ । to go.

पा (Anit) 1 P. पाने । to drink, to feast on, to swallow up, Act. पिबति, अपिबत पिबतु, पिबेयं, पपौ, पपिथ or पपाथ, पातास्मि, पास्यति, अपास्यत्, अपात्, पेयासं, Pass. पीयते, Caus. पाययते-पाययति (when not conveying a reflective sense, as वत्सान्पाययतिपय), अपीप्यत or अपीप्यत्. Desid. पिपासति Deri पीत, पेय, पातुं, पीत्वा, निपाय, पिबत्.

पिट् (Set) 1 P. शब्दसंघातयोः । to sound, to assemble, to heap together

पिठ् (Set) 1 P. हिंसाक्लेशनयो. । to injure, to kill, to feel pain

पिंड् (पिडि-Set) 1 A संघाते । to roll into a lump, to heap; to unite

पिन्व् (पिवि—Set) 1 P. सेचने सेवनेच । to sprinkle, to serve.

पिस् (पिसृ—Set) 1 P गतौ । to go. Caus Aor. अपिपेसत्-त.

पील् (Set) 1 P. प्रतिष्टंभे । to check, to impede; to obstruct.

पीव् (Set) 1 P स्थौल्ये । to be fat or thick

पुड् (Set) 1 P मर्दने । to grind.

पुंड् (पुडि—Set) 1 P खंडने । to grind, to pound.

पुंथ् (पुथि—Set) 1 P हिसासंक्लेशनयो. । to kill, to suffer pain.

पुर्व् (Set) 1 P पूरणे । to fill, पुर्वति.

पुल् (Set) 1 P महत्वे । to be great or large, to be lofty or high, to be heaped up.

पुष् (Set) 1 P. पुष्टौ । to nourish, to develop, to support; to enhance, to get, Desid पुपुषिषति or पुपोषिषति. Deri. पुषित or पोषित, पोष्य, पोषितुं, पुषित्वा or पोषित्वा

पू (पूङ्—Set) 1 A. पवने । to purify to clean from chaff, पवते, अपवत, पवतां, पवेय, पुपुवे, पविताहे, पविष्यते, अपविष्ट, अपविषि पविषीय, Pass. पूयते or पाविष्यते अपावि, अपविषि or अपाविषि, Caus पावयति—ते, अपीपवत्—त, Desid. पिपविषते, Deri. पूत or पवित, पव्य or पाव्य, पवितुं, पवित्वा or पूत्वा, पवमान, पविष्यमाण, पुपुवान.

पूय् (पूयी—Set) 1 A. विशरणे, दुर्गंधेच । to split, to stink, Deri. पूत.

पूल् (Set) 1 P संघाते । to collect, to gather, to heap up, to assemble.

पूष् (Set) 1 P. वृद्धौ । to nourish, to increase, to grow.

पृष् (पृषु—Set) 1 P. सेचने हिंसासंक्लेशनयोश्च । to sprinkle, to hurt, to vex, Deri. पर्षित्वा or पृष्ट्वा.

पेल् (पेलृ–Set) 1 P गतौ । to go. Caus Aor. अपिपेलत्

पेव् (पेवृ—Set) 1 A. सेवने । to serve, Caus Aor अपिपेवत्-त .

पेष् (पेषृ–Set) 1 A. निश्चये, प्रयत्नेच । to resolve upon, to strive deligently for, Caus. Aor. अपिपेषत्—त.

पेस् (पेसृ Set) 1 P. गतौ । to go. Caus. Aor. अपिपेसत्-त.

पै (Anit) 1 P. शोषणे । to dry, to wither पायति.

पैण् (पैणृ—Set) 1 P. गति-प्रेरण-श्लेषणेषु । to go, to send, to touch, to embrace, Caus. Aor. अपिपैणत्—त.

प्याय् (ओ—प्यायी—Set) 1 A. वृद्धौ । to grow, to increase, to swell, Perf. पिप्ये, पिप्यिषे, Deri. पीन or प्यान, प्रप्यान, आपीन.

प्यै (प्यै-ङ्—Anit) 1 A. वृद्धौ । to grow, प्यायते.

प्रथ् (प्रथ—Set) 1 A. प्रख्याने । to become famous, to increase, to spread abroad, to arise, to appear.

प्रस् (प्रस—Set) 1 A. विस्तारे । to extend, to expand

प्रु (प्रु-ङ्-Anit) 1 A. गतौ । to go, to jump. Caus. प्रावयति, अपिप्रवत् or अपुप्रवत्, Desid. पुप्रूषते, Desid of Caus. पुप्रावयिषति or पिप्रावयिषति.

प्रुड् (Set) 1 P. मर्दने । to rub

प्रुष् { प्रुषु } (Set) 1 P. दाहे । to burn, to reduce to ashes, Desid. पुप्रुषिषति or पुप्रोषिषति Deri. प्रुष्ट, प्रोषितु प्रुष्ट्वा or प्रुषित्वा or प्रोषित्वा.
प्लुष् { प्लुषु }

प्रेष् (प्रेषृ—Set) 1 A. गतौ । to go. Caus. Aor. अपिप्रेषत्—त.

प्रोथ् (प्रोथृ–(Set) 1 U पर्याप्तौ । to be equal to, to be a match for, to be complete, Caus. Aor. अपप्रोथत्—त.

प्लक्ष् (Set) 1 U. अदने । to eat.

प्लिह् (प्लिहृ—Set) 1 A गतौ । to go.

प्लु (प्लु–ङ्—Anit) 1 A. गतौ । to go, to jump, to fly, to float, to swim, Caus. प्लावयति–ते, अपुप्लवत्–त or अपिप्लवत्–त, Desid पुप्लूषते, Desid of the Caus. पुप्लावयिषति–ते or पिप्लावयिषति–ते Deri प्लाव्य.

फक्क् (Set) 1 P नीचैर्गतौ । to behave ill, to go softly.

फण् (Set) 1 P गतौ । to go, to produce easily Perf पफाण पफणु or फेणु., पफणिथ or फेणिथ Aor अफणीत् or अफाणीत्. Caus. फणयति–ते (also फाणयति–ते, according to some) Deri. फणित, फाण्ट in the second sense फेणिवस् or पफण्वस्.

फल् (Set) 1 P निष्पत्तौ । to bear fruit, to result, to succeed, to be useful or fruitful, Perf. पफाल. फेलु , फेलिथ, Caus. फालयति—ते Deri. फलित, फलित्वा, फलितुं

फल् (ञि—फला—Set) 1 P विशरणे । to burst open, to split, Deri. फुल्ल, उत्फुल्ल, संफुल्ल. but प्रफुल्त.

फुल्ल् (Set) 1 P विकसने । to open, to expand, to blow,

फेल् (फेलृ—Set) 1 P गतौ । to go. Caus. Aor. अपिफेलत्—त.

बण् (Set) 1 P. शब्दे । to sound; Aor. अबणीत् or अबाणीत्.

बद् (Set) 1 P स्थैर्ये । to be steady or firm, Aor. अबदीत्. or अबादीत.

बध् (Set) 1 P चित्तविकारे । to loathe , to be disgusted with, to shrink from, Act बीभत्सते, अबीभत्सत बीभत्सतां, बीभत्सेय, बीभत्साञ्चक्रे, बीभत्सिताहे, बीभत्सिष्यते, अबीभत्सिष्यत अबीभत्सिष्ट, बीभत्सिषीय, Pass बीभत्स्यते बीभत्सिष्यते, अबीभत्सि. Caus. बीभत्सयति–ते, अबीभत्सत्—त. Desid. बीभत्सिषति. Deri बीभत्सित, बीभत्सितुं, बीभत्सित्वा.

बँर्व् (Set) 1 P. गतौ । to go.

बर्ह् (बर्ह्—Set) 1 A. परिभाषण-हिंसा-प्रदानेषु । to be pre-eminent; to speak to kill, to give,

बल् (Set) 1 P. प्राणने, धान्यावरोधेच । to breathe; to hoard grain.

बल्ह् (बल्ह्-Set) 1 A प्राधान्ये । to be pre-eminent

बंह् (बहि-Set) 1 A. वृद्धौ । to grow, to increase.

बाड् (बाडृ-Set) 1 A. आप्लाव्ये । to bathe , to dive, Caus Aor. अबबाडत्-त.

बाध् (बाधृ-Set) 1 A. लोडने । to oppress, to torment, Caus. Aor. अबबाधत्-त

बाह् (बाहृ—Set) 1 A. प्रयत्ने । to endeavour, Caus. Aor. अबबाहत्—त.

बिट् (Set) 1 P आक्रोशे । to swear, to curse, to shout.

बिंद् (बिदि—Set) 1 A. अवयवे । to split, to cleave, to divide.

बुक्क् (Set) 1 P भषणे । to bark; to sound; to yelp, to speak.

बुध् (बुधिंर्—Set) 1 U. बोधने । to know, to understand, to think; Aor. अबुधत् or अबोधीत्, अबोधिष्ट.

बुध् (Set) 1 P. अवगमने । to make known; to inform, to teach.

बुंद् (उ-बुन्दिंर्-Set) 1 U. निशामने । to perceive, to apprehend; Aor. अबुन्दत् or अबुन्दीत्. अबुन्दिष्ट Deri. बुन्न, बुंदित्वा or बुत्वा.

बृह् (बृहिंर्-Set) 1 P. वृद्धौ । to grow, to increase, Aor. अबृहत् or अबर्हीत्.

बृंह् (बृहि-Set) 1 P. वृद्धौ शब्देच । to increase, to sound.

बेह् (बेहृ-Set) 1 A. प्रयत्ने । to endeavour

भक्ष् (भक्षं-Set) 1 U. अदने । to eat

भज् (भजं-Anit) 1 U सेवायां । to worship, to honour, to divide, to be attached to, to serve. Perf. बभाज-भेजे. बभक्थ or भेजिथ.

भेजिषे. भक्तास्मि—हे. भक्ष्यति—ते. अभक्ष्यत्-त अभाक्षीत्-अभक्त. भज्यास्तं—भक्षीय. Caus. भाजयति-ते Desid बिभक्षति-ते. Deri. भक्त भाज्य or भाग्य भक्तुं. भक्त्वा.

भट् (Set) 1 P. भृतौ । to hire, to nourish, Aor. अभटीत् or अभाटीत्.

भट् (घटादिः) 1 P. परिभाषणे । to speak, Caus भटयति-ते

भण् (Set) 1 P शब्दे । to speak, to call, Aor. अभणीत् or अभाणीत्

भंड् (भडि-Set) 1 A. परिभाषणे । to speak, to jest, to chide.

भंद् (भदि-Set) 1 A. कल्याणे सुखे च । to be prosperous or glad.

भर्व् (Set) 1 P हिंसायाम् । to kill.

भल् { भल } (Set) 1 A. परिभाषण—हिंसा-दानेषु । to speak, to kill, to give.
भल्ल् { भल्ल }

भष् (Set) 1 P भर्त्सने । to bark, to revile. Aor. अभषीत् or अभाषीत्.

भाम् (भाम-Set) 1 A. क्रोधे । to be angry.

भाष् (भाष-Set) 1 A. व्यक्तायां वाचि । to speak, to say; to call, to describe.

भास् (भासृ-Set) 1 A. दीप्तौ । to shine, to appear, to become evident. Caus. Aor अबभासत्-त अबीभसत्-त.

भिक्ष् (भिक्ष-Set) 1 A. भिक्षायामलाभे लाभे च । to ask; to beg for without obtaining, to be weary or distressed, to obtain.

भिंद् (भिदि-Set) 1 P. अवयवे । to split, to divide.

भू (Set) 1 P. सत्तायाम् । to be (A or U. to obtain, to attain). Perf. बभूव—बभूवे. Aor. अभूत—अभविष्ट. Pass भूयते भविष्यते or भाविष्यते. अभावि. अभविषि or अभाविषि. Desid बुभूषति-ते. Deri. भूत. भाव्य or भव्य.

भूष् (Set) 1 P. अलंकारे । to adorn, to decorate.

भृ (भृ-ञ्-Anit) 1 U भरणे । to support, to bear, to have, to fill, Perf. बभार-बभ्रे. बभर्थ-बभृषे, भर्तास्मि-हे, भरिष्यति—ते. अभरिष्यत्-त अभार्षीत्-अभृत भ्रियासं-भृषीय, Pass भ्रियते, भरिष्यते or भारिष्यते अभारि अभृषि or अभारिषि. Caus. भारयति-ते, Desid बुभूर्षति-ते or बिभरिषति-ते Deri भृत. भार्य. भर्तुं. भृत्वा.

भृज् (भृजी-Set) 1 A. भर्जते । to parch, to fry, P. P भृक्त.

भेष् (भेषृ-Set) 1 U भयेगतौच । to fear, to go, Caus Aor. अबिभेषत्–त.

भ्यस् (भ्यस—Set) 1 A. भये । to fear.

भ्रक्ष् (भ्रक्ष—Set) 1 U. अदने । to eat

भ्रण् (Set) 1 P. शब्दे । to speak, Aor. अभ्रणीत् or अभ्राणीत्.

भ्रम् (भ्रमु—Set) 1 P. चलने । to roam about, Deri. भ्रांत. भ्रामित्वा or भ्रात्वा Caus भ्रमयति (also भ्रामयति according to some).

भ्रश् (भ्रंश—Set) 1 A अवस्रंसने । to fall, to drop down.

भ्रंश् or भ्रंस् { (भ्रशु) (भ्रंसु) } (Set) 1 A अवस्रंसने । to fall, to drop down, Aor. अभ्रशत् or अभ्रंशिष्ट. Deri. भ्रष्ट, भ्रशित्वा or भ्रष्ट्वा.

भ्राज् (टु—भ्राजृ—Set) 1 A दीप्तौ । to shine, to glitter., Perf बभ्राजे or भ्रेजे. Caus Aor. अबिभ्रजत्—त. or अबभ्राजत्—त

भ्राश् (टु—भ्राशृ—Set) 1 A. दीप्तौ । to shine, to glitter Caus. Aor. अबभ्राशत्—त.

भ्रेज् (भ्रेजृ—Set) 1 A. दीप्तौ ।to shine, to glitter, Caus. Aor. अबिभ्रेजत्—त

भ्रेष् (भ्रेषृ-Set) 1 U. भये गतौच । to fear, to go. Caus. Aor अबिभ्रेषत्—त.

भ्लक्ष् (भ्लक्ष-Set) 1 U. अदने । to eat.

भ्लाश् (टु—भ्लाशृ—Set) 1 A. दीप्तौ । to shine, to glitter. Caus. Aor. अबभ्लाशत्—त.

भ्लेष् (भ्लेषृ-) 1 U. दीप्तौ । to shine, to glitter, Caus. Aor. अबिभ्लेषत्—त.

मक्ष् (Set) 1 P संघाते । to collect.

मख् (Set) 1 P गतौ । to go, Aor अमखीत् or अमाखीत्.

मंक् (मकि–Set) 1 A. मडने । to adorn, to decorate.

मंख् { मखि } (Set) 1 P. गतौ । to go.
मंग् { मगि }

मंघ् (मघि–Set) 1 A. गत्याक्षेपे गत्यारंभे कैतवेच । to go, to blame, to be moving, to cheat.

मंघ् (मघि–Set) 1 P. मंडने । to adorn, to decorate.

मच् (मच–Set) 1 A दंभे-कत्थने-कल्कनेच । to cheat, to boast, to pound

मज् (Set) 1 P. मदने शब्दार्थेच । to be mad, to sound. Aor. अमजीत् or अमाजीत्.

मंच् (मचि–Set) 1 A धारणोछ्राय—पूजनेषु । to hold, to grow high, to adore

मंज् (मजि–Set) 1 P शब्दे । to sound.

मठ् (Set) 1 P मर्दनिवासयोः । to grind, to dwell, Aor. अमठीत् or अमाठीत.

मण् (Set) 1 P शब्दे । to sound, to murmur, Aor. अमणीत् or अमाणीत्

मंठ् (मठि–Set) 1 A शोके । to remember with regret; to grieve for

मंड् (माडि–Set) I A. विभाजने । to divide, to clothe, to surround.

मंड् (माडि–Set) 1 P. भूषायाम् । to adorn oneself

मंथ् (मथे–Set) 1 P. विलोडने । to churn, to stir; Aor अमथीत्.

मंथ् (माथि–Set) 1 P. हिंसा-क्लेशनयोः । to kill, to injure; to be afflicted, to suffer pain

मंथ् (Set) 1 P विलोडने । to churn, to stir, to shake, to kill, to crush, to tear off, Bene मथ्यासम्, Pass. मथ्यते Deri मथित. मंथित्वा or मथित्वा. मेथिवस्

मंद् (मदि-Set) 1 A स्तुति—मोद—मद—स्वप्न—कांति—गतिषु । to praise, to be glad, to be proud, to sleep, to shine, to move slowly

मभ्र् (Set) 1 P. गतौ । to go.

मय् (मय-Set) 1 A गतौ । to go.

मर्ब् (Set) 1 P गतौ । to go

मर्व (Set) 1 P पूरणे । to fill.

मल् { मल-(Set) } 1 A. धारणे । to hold, to possess.
मल्ल { मल्ल-(Set) }

मव् (Set) 1 P बन्धने हिंसायांच । to bind, to kill, Aor अमवीत् or अमावीत्

मव्य् (Set) 1 P. बन्धने । to bind.

मश् (Set) 1 P शब्दे-कोपेच । to sound to be angry Aor. अमशीत् or अमाशीत्

मष् (Set) 1 P. हिंसायाम् शब्देच । to kill, to sound, Aor. अमषीत् or अमाषीत्

मस्क् (मस्कु—Set) 1 A. गतौ । to go.

मह् (Set) 1 P पूजायाम् । to worship; to revere

मंह् (महि-Set) 1 A वृद्धौ । to grow old.

मांक्ष् (माक्षि-Set) 1 P. कांक्षायाम् । to desire, to wish.

मान् (मान-Set) 1 A जिज्ञासायां । to investigate, to examine; मीमांसते. मीमांसाचक्रे. मीमांसिताहे मीमांसिष्यते. अमीमांसिष्यत. अमीमांसिष्ट. मीमांसिषीय Pass मीमांस्यते. अमीमांसि. Caus. मीमांसयति-ते. अमीमांसत्-त. Desid. मीमांसिषते, Deri. मीमांसित मीमांसितुं. मीमांसित्वा.

माह् (माहृ Set) 1 U. माने । to measure.

मिथ् (मिथृ—Set) 1 U मेधाहिंसयोः । to understand, to hurt.

मिद् (ञिमिदा–Set) 1 A. स्नेहने । to love to melt, Aor अमिदत् or अमेदिष्ट Caus Aor. अमीमिदत्—त Desid मिमिदिषते or मिमेदिषते. Deri मिन्न or मे दित, मिदित्वा or मेदित्वा मेदितुं.

मिद् (मिदृ-Set) 1 U मेधा-हिंसयो. । to understand, to kill, Caus Aor. अमिमेदत्—त.

मिध् (मिधृ—Set) 1 U. मेधा-हिंसयो । to understand, to kill, Caus Aor. अमिमेधत्–त

मिन्व् (मिवि–Set). 1 P. स्नेहने—सेचनेच । to love, to sprinkle

मिश् (Set) 1 P शब्दे—रोषकृतेच । to make noise, to be angry

मिष् (मिषु—Set) 1 P सेचने । to sprinkle, to wet, to serve, Desid मिमिषिषति or मिमेषिषति. Deri मिष्ट, मिषित्वा or मेषित्वा or मिष्ट्वा मेषितु.

मिष् (Set) 1 P. शब्दे—रोषकृतेच । to make noise, to be angry Deri मेषित मेषित्वा

मिह् (Anit) 1 P. सेचने । to sprinkle, to make water, to wet मेहति मिमेह. मेढास्मि मेक्ष्यति. अमेक्ष्यत् आमिक्षत्. मिह्यासं Desid मिमिक्षति Deri. मीढ. मेढव्य. मेढुं मीढ्वा

मीम् (मीमृ–Set) 1 P गतौ । to go. Caus, Aor. अमिमीमत—त.

मील् (Set) 1 P. निमेषणे । to close the eyes, to twinkle, to fade, to disappear, Caus Aor अमीमिलत्-त. or अमिमीलत्—त.

मीव् (Set) 1 P. स्थौल्ये । to grow fat or large.

मुज् (Set) 1 P. शब्द । to sound.

मुंच् (मुचि–Set) 1 A. कल्कने–कथनेच । to cheat, to be wicked, to tell.

मुंज् (मुजि–Set) 1 P. शब्दे । to sound.

मुद् } (Set) 1 P मर्दने । to crush, to grind, to break.
मुड् }

मुंड् (मुडि–Set) 1 A. पालने-पलायनेवा । to protect, to run away.

मुंड् (मुडि—Set) 1 A. मार्जने मज्जनेवा । to be pure, to sink.

मुंड् (मुडि-Set) 1 P खंडने । to grind, to shave, to shear.

मुद् (मुद—Set) 1 A हर्षे । to be glad, to rejoice, Desid मुमुदिषते or मुमोदिषते Deri. मुदित or मोदित. मुदित्वा or मोदित्वा मोदितुं. प्रमुद्य

मुर्छ् (मुर्च्छा—Set) 1 P. मोह-समुच्छ्राययो । to faint, to increase, to grow, to become strong, to take effect on. मूर्च्छति. Deri. मूर्च्छित or मूर्त.

मुर्व् (मुर्वी—Set) 1 P. बन्धने । to bind, P. P. मूर्ण.

मू (मू-ङ्-Set) 1 A. बन्धने । to bind. मवते. मुमुवे मविताहे मविष्यते, अमविष्ट. मविषीष्ट, Caus. मावयति—ते. अमीमवत्-त. Desid. मुमूषते Desid Caus मिमावयिषति—ते.

मूल् (Set) 1 P प्रतिष्ठायाम् । to take root, to be firm, to accumulate.

मूष् (Set) 1 P स्तेये । to steal, to rob.

मृक्ष् (Set) 1 P. संघाते । to collect, to rub

मृज् (मृजू—Wet) 1 P. शौचालंकारयो. । to cleanse, to wipe off. to adorn, to sharpen. Act. मार्जति अमार्जत् मार्जतु मार्जेयं. ममार्ज. ममार्जिथ or ममार्ष्ठ मार्जितास्मि or मार्ष्टास्मि. मार्जिष्यति or मार्क्ष्यति अमार्जिष्यत् or अमार्क्ष्यत् अमार्जीत् or अमार्क्षीत्. मृज्यासं. Pass मृज्यते. मार्जिष्यते or मार्क्ष्यते. अमार्जि Desid. मिमार्जिषति or मिमृक्षति. Deri. मृष्ट. मृज्य. मार्जितु or मार्ष्टुं. मार्जित्वा or मृष्ट्वा परिमृज्य.

मृध् (मृधु—Set) 1 U. उन्दने हिंसायांच । to moisten, to kill, Deri. मृद्ध मर्धित्वा or मृद्ध्वा मर्धितुं

मृष् (मृषु—Set) 1 P. सेचने सहनेच । to sprinkle, to endure, Caus. Aor. अममर्षत्-त or अमीमृषत-त Desid. मिमर्षिषति-ते Deri. मृष्ट. मृष्ट्वा. मृषित्वा or मर्षित्वा. मर्षितुं.

मे (मे-ङ्—Anit) 1 A. प्रणिदाने । to return, to exchange. मयते. ममे. माताहे-मास्यते. अमास्त. मासीष्ट Caus. मापयति—ते अमीमपत्—त Desid. मित्सते. Deri. मित मित्वा निमाय or निमित्य. अपमित्य अपमाय मातुं.

मेथ् मेथृ—Set 1 U मेधा-हिंसयो । to know, to understand, to kill, to hurt, Caus Aor. अमिमेथत्—त.

मेध् (मेधृ—Set) 1 U. मेधा-हिंसयो संगमेच । to know, to kill, to meet, Caus. Aor. अमिमेधत्-त.

मेप् (मेपृ—Set) 1 A गतौ । to go, Caus Aor अमिमेपत्—त.

मेव् (मेवृ—Set) 1 A सेवने । to serve, to worship.

म्ना (Anit) 1 P अभ्यासे । to study, to repeat, to remember, to think, Act मनति, अमनत्. मनतु. मनेयं मम्नौ मम्निथ or मम्नाथ म्नातास्मि म्नास्यति. अम्नास्यत् . अम्नासीत् म्नायासं or म्नेयासं. Pass म्नायते म्नास्यते or म्नायिष्यते. अम्नायि अम्नासि or अम्नायिषि. Caus. म्नापयति—ते. अमिम्नपत्—त. Desid मिम्नासति. Deri म्नात म्नेय म्नातुं म्नात्वा

म्रक्ष् (Set) 1 P. संघाते । to collect, to rub.

म्रद् (म्रद—Set) 1 A. मर्दने । to crush, to pound, Pass. Aor. अम्रदि, अम्रादि Caus. म्रदयति—ते.

म्रुच् or म्लुच् (म्रुचु / म्लुचु) (Set) 1 P गतौ । to go or move Aor अम्रुचत् or अम्रोचीत् Desid मुम्रुचिषति or मुम्रोचिषति Deri म्रुक्त, म्रोचित्वा or म्रुचित्वा or म्रुक्त्वा.

म्रुंच् (म्रुचु—Set) 1 P. गतौ । to go, to move. Deri म्रुक्त, म्रुचित्वा or म्रुक्त्वा.

म्रेट् / म्रेड् (म्रेटृ / म्रेडृ) (Set) 1 P. उन्मादे । to be mad Caus. Aor. अमिम्रेटत्-त. अमिम्रेडत्—त.

म्लुंच् (म्लुचु—Set) 1 P. गतौ । to go, to move

म्लेच्छ् (Set) 1 P अव्यक्ते शब्दे । to speak indistinctly.

म्लेद् { म्लेदृ } (Set) 1 P उन्मादे । to be mad. Caus. Aor.
म्लेड् { म्लेडृ } अमिम्लेटत्—त अमिम्लेडत्.

म्लेव् (म्लेवृ—Set) 1 A. सेवने । to serve, to worship. Caus. Aor. अमिम्लेवत्—त.

म्लै (Anit) 1 P. हर्षक्षये । to be sad, to become weary, to fade, to be emaciated म्लायति, मम्लौ, मम्लिथ or मम्लाथ, म्लातास्मि. म्लास्यति. अम्लास्यत्. अम्लासीत, म्लायासं, म्लेयासं. Pass म्लायते. म्लास्यते or म्लायिष्यते. अम्लायि. अम्लासि or अम्लायिषि. Caus. म्लापयति—ते, अमिम्लपत्—त Desid. मिम्लासति, Deri. म्लान. म्लेय म्लातुं. म्लात्वा. प्रम्लाय.

यज् (यजँ—Anit) 1 U. देवपूजा—संगतिकरण—यजन—दानेषु । to make an oblation to a deity, to associate with, to sacrifice, to worship, to give Act इयाज्—ईजे, इयजिथ or इयष्ठ—ईजिषे. यष्टास्मि—हे, यक्ष्यति—ते, अयक्ष्यत्—त. अयाक्षीत्—अयष्ट. अयाष्टाम्. अयक्षाताम्. इज्यासं—यक्षीय. Pass इज्यते. यक्ष्यते. अयाजि, अयक्षत. Caus याजयति-ते, अयीयजत्-त. Desid. यियक्षति—ते. Deri. इष्ट, यष्टव्य, याज्य, यष्टुं, इष्ट्वा, समिज्य.

यत् (यती—Set) 1 A. प्रयत्ने । to strive after, to be watchful, Caus. यातयति-ते Deri यत्त, यतितव्य.

यभ् (Anit) 1 P मैथुने । to cohabit, Act. यभति, ययाभ, येभिथ, ययब्ध, यब्धास्मि, यप्स्यति, अयाप्सीत् यभ्यासं Caus. याभयति-ते, Desid यियप्सते. यब्ध, यब्ध्वा, यब्धुं.

यम् (Anit) 1 P उपरमे । to check, to stop, (For A. see page 17). Act. यच्छति-ते. अयच्छत्—त. यच्छतु—तां. यच्छेयं-य, ययाम—इयमे, इयमिथ or ययन्थ-येमिषे, यंतास्मि-हे. यंस्यति-ते, अयंस्यत्-त अयंसीत्-अयंस्त, यम्यासं, यंसीय, Caus. यामयति-ते, but with आ-आयामते only, with नि-नियमयति-ते According to स्वामी, Deri' यत, यम्य, यंतु, यत्वा, नियम्य or नियत्य, यच्छत्-मान, येमिवस्-येमान.

यस् (Set) 1 P. प्रयत्ने । to endeavour; Caus. यासयति-ते, but with आ, आयासयते only. Deri. यस्त, यास्य, यसित्वा or यस्त्वा.

याच् (टु, याचृ॑-Set) 1 U. (generally A. in use) यांचायाम्। to beg, to ask, to solicit, Caus. Aor. अययाचत्—त.

युंग् ((युगि—Set) 1 P. वर्जने । to abandon, to desert.

युच्छ् (Set) 1 P. प्रमादे । to err, to be negligent.

युज् (Anit) 1 P. संयमने । to unite, to bind, to yoke, Act. योक्तास्मि, योक्ष्यति, अयोक्ष्यत् अयौक्षीत्, युज्यासं. Desid युयोजिषति—ते, युयुक्षति-ते Deri. युक्त.

युत् (युतृ—Set) 1 A. भासने । to shine. Caus Aor अयुयोतत्-त.

यूष् (Set) 1 P हिंसायाम् । to injure, hurt or kill

येष् (येषृ-Set) 1 A. प्रयत्ने । to try, to attempt, Caus. Aor. अयियेषत्—त.

यौट् { यौटृ } (Set) 1 P. बंदे । to bind, Caus Aor. अयुयौटत्—त.
यौड् { यौडृ } अयुयौडत्-त.

रक्ष् (Set) 1 P. पालने । to protect, to watch, to take care of, Caus. रक्षयति-तै.

रख् (Set) 1 P. गतौ । to go, Aor. अरखीत् or अराखीत्.

रग् (रगे-घटादि —Set) 1 P शंकायां । to doubt, Aor. अरगीत् Caus. रगयति-ते

रंख् { रखि } (Set) 1 P. गतौ । to go, to move.
रंग् { रगि }

रंघ् (रघि॑ —Set) 1 U. गतौ । to go, to hasten.

रंज् (Anit) 1 U रागे । to be coloured, to redden, to dye, to be attached to, to be excited, to be pleased with रंजति-ते. अरंजत्-त, रंजतु-तां, रंजेयं-य, ररंज-जे, ररंजिथ or ररंक्थ-ररंजिषे, रक्तास्मि-हे, रंक्ष्यति-ते. अरंक्ष्यत्-त, अरांक्षीत्—अरंक्त, रज्यासं—रंक्षीय. Pass रज्यते, रंक्ष्यते, अरांजि, अराक्षि, Caus रंजयति-ते, also रजयति-ते (to hunt deer), अररजत्—त, also अरीरजत्—त Desid. रिरंक्षति-ते Deri रक्त, रंक्तुं, रंक्त्वा, or रक्त्वा, उपरज्य

रट् { (Set) 1 P परिभाषणे । to roar, to yell, to proclaim aloud, to
रठ् { shout, Aor अरटीत् or अराटीत्, Caus. राटयति—ते.

रण् (Set) 1 P. शब्दे । to sound, to ring, to jingle, Aor. अरणीत् or अराणीत्, Caus राणयति—ते.

रण् (घटादि -Set) 1 P गतौ । to go, Caus रणयति–ते, Pass. Aor. अरणि, अराणि.

रण्व् (रवि—Set) 1 P गतौ । to go.

रद् (Set) 1 P विलेखने । to split, to scratch, Aor. अरदीत् or अरादीत्.

रप् (Set) 1 P व्यक्तायांवाचि । to talk, to speak, Aor. अरपीत् or अरीपीत्.

रफ् (Set) 1 P हिंसायां गतौच । to kill, to go Aor. अरफीत् or अराफीत्.

रभ् (रभ—Anit) 1 A राभस्ये । to begin, to desire, to act rashly, Aor. रब्धाहे, रप्स्यते, अरप्स्यत, अरब्ध, अरप्सत, रप्सीय, Caus. रंभयति—ते, अररंभत्—त, Desid. रिप्सते, Deri. रब्ध, रभ्य, रब्धुं, रब्ध्वा आरभ्य.

रम् (रम-Anit) 1 A (For P. see page 17) क्रीडायाम् । to sport, to rest, to be pleased, to rejoice at, to have sexual intercourse with, Act रेमे, रेमिषे, ररंथ, रंताहे—स्मि, रंस्यते—ति, अरस्यत–त्, अरंस्त, अरंसीत्, रंसीय, रम्यासं, Caus रमयति—ते, अरीरमत्, Desid रिरंसते--ति, Deri. रत, रम्य, रंतुं, रत्वा, or रमित्वा, विरम्य or विरत्य.

रंफ् (रफि—Set) 1 P. गतौ हिंसायांच । to go, to kill

रंब् / रंभ् { रबि / रभि } (Set) 1 A. शब्दे । to sound

रय् (रय-Set) 1 A गतौ । to go, to move.

रश् (a sautra root–Set) 1 P. स्वने । to sound, Aor अरशीत् or अराशित्.

रस् (Set) 1 P. शब्दे । to roar, to cry, to make noise, to praise, Aor. अरसीत् or अरासीत्.

रह् (Set) 1 P त्यागे । to abandon, to quit.

रंह् (रहि-Set) 1 P. गतौ । to go, to move.

राख् (राखृ-Set) 1 P. शोषणालमर्थयोः । to dry, to adorn, to be able, Caus Aor. अरराखत्-तैं

राघ (राघृ-Set) 1 A सामर्थ्ये । to be able, Caus Aor. अरराघत्-त,

राज् (राजृ-Set) 1 U. दीप्तौ । to shine, to glitter, to appear like, Act रराज-रराजे-रेजे, रराजिथ-रेजिथ, रराजिषे-रेजिषे.

राश् { राशृ } Set 1 A. शब्दे । to sound, Caus. Aor. अरराशत्—त, अररासत्—त.
रास् { रासृ }

रिख् (Set) 1 P गतौ । to go, to move.

रिंख् { रिखि } (Set) 1 P गतौ । to go, to move.
रिंग् { रिगि }

रिच् (Anit) 1 P वियोजन-सम्पर्चनयोः । to separate, to divide, to join, Act रेक्तास्मि, रेक्ष्यति, अरेक्ष्यत्, अरैक्षीत्, रिच्यासं, Deri. रिक्त, रिक्त्वा, रेक्तुं.

रिण्व् (रिवि-Set) 1 P. गतौ । to go, to move

रिष् (Set) 1 P हिंसायाम् । to kill, to destroy, to injure, रेष्टास्मि or रेषितास्मि, Desid रिरिषिषति or रिरेषिषति, Deri. रिष्ट, रेषितव्य or रेष्टव्य, रेषितुं or रेष्टुं, रिषित्वा or रेषित्वा or रिष्ट्वा.

रु (रुङ्—Anit) 1 A. गतिरेषणयोः । to go, to kill. रवते, रुरुवे, रविताहे, रविष्यते, अरविष्ट, रविषीय.

रुच् (रुच—Set)1 A. दीप्तावभिप्रीतौच । to shine, to please, to like, to appear good, Aor. अरुचत् or अरोचिष्ट. Caus. रोचयते, अरूरुचत, Desid. रुरुचिषते or रुरोचिषते, Deri रुचित or रोचित, रुचित्वा or रोचित्वा.

रुट् (रुट-Set) 1 A. प्रतिघाते । to strike, to oppose, Aor. अरुटत् or अरोटिष्ट.

रुठ् (Set) 1 P. उपघाते । to strike down, to fell.

रुंट् (रुटि—Set) 1 P. स्तेये । to steal, to rob.

रुंठ् (रुठि—Set) 1 P स्तेये गतौच । to steal, to be lame, to go.

रुंड् (रुडि—Set) 1 P स्तेये । to steal.

रुषूं (Set) 1 P हिंसायाम् । to kill, Act. रोषितास्मि, रोष्टास्मि, Desid रुरुषिषति or रुरोषिषति Deri रुष्ट, रुषित्वा or रोषित्वा or रुष्ट्वा, रोषितुं or रोष्टुं.

रुह् (Anit) 1 P बीजजन्मनिप्रादुर्भावेच । to grow from seed, to become manifest, to grow, to rise, to ascend रोढास्मि, रोक्ष्यति, अरोक्ष्यत्, अरुक्षत्, रुह्यासं, Caus. रोहयति-ते or रोपयति-ते, अरूरुहत्-त or अरूरुपत्—त, Desid. रुरुक्षति, Deri रूढ, रोह्य, रोढुं, रूढ्वा, आरुह्य.

रूष् (Set) 1 P भूषायां । to decorate, to smear, to cover.

रेकृ (रेकृ—Set) 1 A शंकायाम् । to doubt, Caus Aor अरिरेकत्-त.

रेट् (रेटृ—Set) 1 P. परिभाषणे । to speak, to ask, to request, Caus. Aor अरिरेटत्-त.

रेपृ (रेपृ-Set) 1 A गतौ । to go, to move, Caus. Aor अरिरेपत्-त

रेभ् (रेभृ—Set) 1 A शब्दे । to speak, Caus Aor अरिरेभत्-त.

रेव् (रेवृ—Set) 1 P प्लावगतौ । to leap, to go, to move, Caus. Aor अरिरेवत्.

रेष् (रेषृ —Set) 1 A. अव्यक्ते शब्दे । to utter an inarticulate sound, to neigh, to roar Caus Aor अरिरेषत्-त.

रै (Anit) 1 P. शब्दे । to sound.

रोड् (रोडृ—Set) 1 P अनादरे उन्मादेच । to despise, to be mad, Caus. Aor अरुरोडत्-त.

लख् (Set) 1 P. गतौ । to go, to move, Aor अलखीत्, अलाखीत्.

लग् (लगे-घटादि -Set) 1 P संगे । to adhere to, to become united, to come in contact, to happen, to approach, to touch, to produce an effect. Caus लगयति—ते, अलीलगत—त, Pass. Aor. अलगि, अलागि, Deri लग्न, rarely लगित.

लंख् (लखि—Set) 1 P. गतौ । to go or move

लंग् (लगि–Set) 1 P. गतौ । to go, to limp.

लंघ् (लघि—Set) 1 P. शोषणे । to dry up, to diminish, to mount upon.

लंघ् (लघि—Set) 1 A गत्यर्थे-भोजननिवृत्तौच । to go, to fast, to transgress.

लच्छ् (Set) 1 P. लक्षणे । to mark.

लज् (Set) 1 P भर्जने । to fry, to roast, Aor अलजीत् or अलाजीत्.

लंज् (लजि–Set) 1 P. भर्जने । to fry, to roast, to blame, to traduce.

लट् (Set) 1 P. बाल्ये । to be a child, to act or talk like a child, to cry. Caus. अलटीत्–अलाटीत्.

लड् (Set) 1 P विलासे । to play, Aor. अलडीत्, अलाडीत्, Caus लाडयति–ते.

लड् (घटादि.—Set) 1 P. जिह्वोन्मथने । to loll the tongue, to churn, to blame, to harass, Aor. अलडीत्, अलाडीत्, Caus· लडयति–ते Pass Aor अलडि, अलाडि

लंड् (ओलडि–Set) 1 P. उत्क्षेपणे । to throw up, Desid लिलडिषति·

लंड् (लडि-Set) 1 P भाषायाम् दीप्तोच । to speak, to shine

लप् (Set) 1 P व्यक्तायां वाचि । to speak, to prate, to whisper, Aor अलपीत् or अलापीत्.

लभ् (डु-लभ-ष्—Anit) 1 A. प्राप्तौ । to get. to obtain, to take, to have to find, to be able, to know लब्धाहे, लप्स्यते, अलप्स्यत. अलब्ध, लप्सीय, Pass लभ्यते, लप्स्यते, अलंभि or अलाभि, but with प्र, उप Aor प्रालंभि, उपालंभि, Caus लंभयति-ते, अललभत्-त. Desid. लिप्सते, Deri लब्ध, लभ्य, with आ-आलभ्य, लब्धुं, लब्ध्वा, लाब्धिम (produced by gain), लभा (gain).

लंब् (लबि-Set) 1 A शब्देऽवस्रंसनेच । to sound, to delay, to fall, to hang down.

लय् (लंय—Set) 1 A. गतौ । to go, to move.

लर्ब् (Set) 1 P गतौ । to go, to move.

लल् (Set) 1 P विलासे । to play, Caus. लालयति

लष् (लर्ष—Set) 1 U. कांतौ । to wish, to long for.

लस् (Set) 1 P श्लेषणक्रीडनयो । to embrace, to play, to shine. Aor. अलसीत् or अलासीत् Deri. लासित, also लस्त (embraced), लास्य.

लाख् (लाखृ—Set) 1 P शोषणालमर्थयो । to dry, to adorn, to suffice, Caus. Aor अललाखत्—त.

लाघ् (लाघृ—Set) 1 A सामर्थ्ये । to be able, Caus Aor अललाघत्-त.

लाज् { Set } 1 P. भर्त्सने भर्जनेच । to blame, to fry
लांज् { लाजि }

लांछ् (लाच्छि-Set) 1 P. लक्षणे । to mark, to distinguish

लिग् (लिगि—Set) 1 P गतौ । to go, to move; (with आ to embrace.)

ली (Anit) 1 P. द्रवीकरणे । to melt—लयति, अलयत्, लयतु, लयेयं, लिलाय, लिलयिथ or लिलेथ, लेतास्मि, लेष्यति, अलेष्यत्, अलैषीत्, लीयासं, Pass लीयते, लेष्यते or लायिष्यते, अलायि, अलेषि or अलायिषि, Caus. लाययति—ते, अलीलयत्—त, Desid लिलीषति, Deri. लीत, लेय, लेतु, लेतव्य, लीत्वा, लयत्, लेष्यत्.

लुंच् (Set) 1 P. अपनयने । to remove, to pluck, Pass. लुच्यते. Deri. लुचित्वा or लुंचित्वा.

लुंज् (लुजि—Set) 1 P. हिंसा—बलीदान—निकेतन-भाषायां-दीप्तौच । to injure, to be strong; to take, to dwell, to speak, to shine.

लुट् (Set) 1 P. विलोडने । to churn, to agitate; to be connected; to wallow; to roll; Caus Aor. अलूलुटत्—त or अलुलोटत्—त, Desid लुलुटिषति or लुलोटिषति, Deri लुटित or लोटित, लुटित्वा or लोटित्वा.

लुट् or लुठ् { Set } 1 A. प्रतिघाते । to resist, to oppose; Aor. अलुटत् or अलोटिष्ट, अलुठत् or अलोठिष्ट, Desid. लुलुठिषते or लुलोठिषते, लुलुटिषते or लुलोटिषते

लुट् (Set) 1 P उपघाते । Aor to strike, to knock down, Caus. A अलूलुटत्–त or अलुलोठत्–त. Desid. लुलुठिषति or लुलोठिषति.

लुड् (Set) 1 P विलोडने । to churn, to stir; to disturb, Desid. लुलुडिषति or लुलोडिषति, Deri. लुडित or लोडित, लुडित्वा or लोडित्वा.

लुंट् or लुंठ् { लुटि / लुठि } (Set) 1 P. स्तेये—आलस्ये प्रतिघातेच । to steal. to rob; to plunder, to be idle, to resist, to be lame.

लुंड् (लुडि—Set) 1 P स्तेये । to steal or rob.

लुंथ् (लुथि—Set) 1 P. हिंसा—क्लेशनयो । to strike, to suffer pain.

लुंब् (लुबि— Set) 1 P. अर्दने । to torment.

लुल् (Set) 1 P विधूने । to move to and fro, to stir, to make tremulous.

लूष् (Set) 1 P. भूषायाम् । to decorate.

लेप् (लेपृ–Set) 1 A. गतौ । to go; to move; Caus Aor. आलिलेपत्–त.

लैण् (लैणृ–Set) 1 P. गति—प्रेरण-श्लेषणेषु । to go, to approach, to embrace, to send.

लोक् or लोच् { लोकृ / लोचृ } (Set) 1 A दर्शने । to see, to perceive, Caus Aor. अलुलोकत्–त, अलुलोचत्–त

लोड् (लोडृ–Set) 1 P. उन्मादे । to be mad, Caus Aor. अलुलोडत्-त.

लोष्ट् (लोष्ट–Set) 1 A. संघाते । to heap up.

वक्ष् (Set) 1 P रोषे संघातेच । to be angry, to collect

वख् (Set) 1 P. गतौ । to go, to move; Aor अवखीत् or अवाखीत्.

वंक् (वकि—Set) 1 A. कौटिल्ये गतौच । to be crooked, to go.

वंख् / वंग् { वखि / वगि } Set 1 P. गतौ । to go, to move.

वंघ् (वघि—Set) 1 A. गत्याक्षेपे । to go, to blame.

वज् (Set) 1 P गतौ। to go, to move; Aor अवजीत् or अवाजीत्.

वंच् (वंचु–Set) 1 P गतौ। to go, Pass वच्यते, Deri वंचित्वा or वञ्चित्वा or वक्त्वा

वट् (Set) 1 P. वेष्टने। to cover, to surround, Aor अवटीत् or अवाटीत्, Caus वाटयति–ते

वट् (घटादि—Set) 1 P परिभाषणे। to speak, Caus वटयति—ते, अवीवटत्—त, Pass Aor अवटि or अवाटि.

वठ् (Set) 1 P. स्थौल्ये। to become fat, Aor अवठीत् or अवाठीत्

वण् (Set) 1 P. शब्दे। to sound Aor. अवणीत् or अवाणीत्, Caus. Aor. अवीवणत्—त, or अववाणत्–त

वंट् { वटि } Set) 1 P विभाजने। to divide
वंड् { वडि }

वठ् (वठि–Set) 1 A एकचर्यायाम्। to go alone.

वद् (Set) 1 P (for A see pages 17 & 18). व्यक्तायांवाचि। to speak; to tell, to describe, to utter, Act उवाद—ऊदे, उवदिथ–ऊदिषे, उद्यासं-वदिषीय, Pass उद्यते, Deri उदित, वाद्य, also अवद्य (despicable), अनुद्य (unutterable), वदितुं, उदित्वा, अनूद्य, वदत्–मान, ऊदिवस्—ऊदान.

वन् (Set) 1 P शब्दे संभक्तौच। to sound, to honour, to aid, Aor. अवनीत् or अवानीत् Caus. वानयति—ते, Deri वनित, वनितुं, वनित्वा.

वन् (वनु—घटादि—Set) 1 P क्रियासामान्ये। to act, Caus. वनयति-ते, Deri. वत, वनित्वा, वत्वा.

वंद् (वदि–Set) 1 A अभिवादनस्तुत्योः। to salute respectfully, to praise.

वप् (डु–वप्—Anit) 1 U बीजसताने छेदनेच। to sow, to plant, to procreate, to weave, to shave, to shear, Act उवाप–ऊपे, उवपिथ, उवप्थ—ऊपिषे वप्तास्मि–हे, वप्स्यति-ते, अवप्स्यत्–त, अवाप्सीत्–अवप्त. उप्यासं-वप्सीय, Pass. उप्यते, वप्स्यते, अवापि, अवाप्सि.

Desid. विवप्सति—ते, Deri उप्त, वप्तव्य, वाप्य, वप्तुं, उप्त्वा, प्रत्युप्य, ऊपिवस् ऊपान, उप्त्रिम

वभ्र् (Set) 1 P. गतौ । to go, to move.

वम् (टु-वम-Set) 1 P उद्गिरणे । to vomit, to drop, to emit, to give out, to reject, Caus वमयति-ते or वामयति-ते, but with उद्, उद्वामयति-ते, Deri वमित or वामित, वांत

वय् (वय—Set) 1 A. गतौ । to go; to move

वर्च् (वर्च-Set) 1 A. दीप्तौ । to shine.

वर्ष् (वर्ष—Set) 1 A. स्नेहने । to melt, to love.

वर्ह् (वर्ह—Set) 1 A परिभाषण-हिंसा-प्रदानेषु । to speak, to kill or hurt, to give

वल् (वल—Set) 1 A संवरणे संचरणेच । to cover, to move Caus. वालयति-ते

वल् (घटादि -Set) 1 P. संवरणे संचरणेच । to cover, to move, Caus. वलयति—ते, Pass. Aor. अवलि, अवालि

वल्ग् (Set) 1 P गतौ । to go, to move, to jump; to gallop, to be pleased

वल्भ् (वल्भ—Set) 1 A. भोजने । to eat, to devour.

वल्ल् (वल्ल-Set) 1 A. संवरणे । to be covered, to go, to move

वल्ह् (वल्ह-Set) 1 A. परिभाषण—हिंसा-प्रदानेषु । to speak, to kill or hurt, to give

वष् (Set) 1 P हिंसायाम् । to hurt, to kill, to injure, Aor. अवषीत् or अवाषीत्

वस् (Anit) 1 P. निवासे । to dwell, to live; Act उवास, उवसिथ or उवस्थ, वस्तास्मि, वत्स्यति, अवत्स्यत्, अवात्सीत्, उष्यासं, Pass. उष्यते, वत्स्यते, अवासि, Caus. वासयते, Desid. विवत्सति, Deri. उषित, उषित्वा, प्रोष्य, वस्तुं.

वस्क् (वस्क–Set) 1 A गतौ । to go, to move.

वह् (Anit) 1 U. प्रापणे to bear, to carry, to flow, to marry; to propel, Act उवाह—ऊहे, उवहिथ or उवोढ—ऊहिषे, वोढास्मि-हे, वक्ष्यति—ते, अवक्ष्यत्—त, अवाक्षीत्, अवोढ, उह्यासं—वक्षीय Pass. उह्यते, वक्ष्यते, अवाहि, अवाक्षि, Caus. वाहयति-ते, अवीवहत्—त, Desid विवक्षति—ते, Deri ऊढ, वाह्य or वह्य, वोढु, ऊढ्वा, प्रोह्य, वहत्—मान, वक्ष्यत-माण, ऊहिवस्—ऊहान.

वांक्ष् (वाक्षि-Set) 1 P कांक्षायां । to wish, to desire.

वांछ् (वाछि-Set) 1 P वांछायाम् । to desire, to wish

वाह् (वाहृ–Set) 1 A प्रयत्ने । to endeavour, Caus. Aor अववाहत्-त

विट् (Set) 1 P. आक्रोशेशब्देच । to curse, to sound.

विथ् (विथृ—Set) 1 A. याचने । to beg, to ask, Caus Aor अविवेथत्-त

विष् (विषु–Anit) 1 P. सेचने । to sprinkle, Act वेषति, विवेष वेष्टास्मि, वेक्ष्यति, विष्यासं, Deri. विष्ट, विषित्वा or विष्ट्वा, वेष्टुं

वुंग् (वुगि-Set) 1 P वर्जने । to abandon, to leave.

वृ (वृ-ञ्-Set) 1 U आवरणे । to cover, to conceal, Act. वरति-ते, ववार—वव्रे, वरितास्मि—वरीतास्मि-हे, वरिष्यति—वरीष्यति-ते, अवीवरत्—त, अवारीत् अवरिष्ट, अवरीष्ट, अवृत, व्रियासं, वरिषीय.

वृक् (वृक-Set) 1 A आदाने । to accept, to seize, वर्कते, Caus. Aor. अवीवृकत्—त, अववर्कत्—त

वृक्ष् (वृक्ष-Set) 1 A. आवरणे । to cover

वृज् (वृजी-Set) 1 P वर्जने । to avoid, वृक्त

वृत् (वृतु—Set) 1 A वर्तने । to be, to happen, to be present, to act, to tend to, वर्तते, ववृते, वर्तिताहे, वर्तिष्यते, वर्त्स्यति, अवृतत्, अवर्तिष्ट, वर्तिषीय, Caus Aor. अवीवृतत्—त or अववर्तत्—त, Desid. विवर्तिषते or विवृत्सति, Deri. वृत्त, वर्तित, वर्तित्वा, वृत्वा, अनुवृत्य, वर्तितु.

वृध (वृधु–Set) 1 A (but P. also in the second Future, Aorist, Conditional and Desiderative). वृद्धौ। to increase, to grow, to continue, to become joyful वर्धिष्यते or वर्त्स्यति, अवर्धिष्यत or अवर्त्स्यत्, अवृधत् or अवर्धिष्ट, वर्धिषीय, Caus. Aor. अवीवृधत्—त or अववर्धत्—त, Desid विवर्धिषते or विवृत्सति, Deri. वृद्ध, वर्धितुं, वृद्ध्वा or वर्धित्वा.

वृष् (वृषु–Set) 1 P सेचन–हिंसा–क्लेशनेषु। to rain, to sprinkle, to kill, to afflict, to give pain, Caus Aor अवीवृषत्—ते or अववर्षत्–त, Deri. वृष्ट, वृष्ट्वा or वर्षित्वा.

वे (वे–ञ्—Anit) 1 U तंतुसंताने। to weave, to sew, to compose. वयति—ते उवाय–ऊवे or ऊये, उवयिथ–ऊविषे or ऊयिषे (also ववौ–ववे, वविथ or ववाथ—वविषे), वातास्मि—हे, वास्यति—ते, अवास्यत्–त, अवासीत्–अवास्त, ऊयासं—वासीय, Pass ऊयते, वाताहे or वायिताहे, अवाहि, अवासि or अवायिषि, Caus वाययति–ते, अवीवयत्–त, Desid विवासति–ते, Deri. उत, वेय, वातव्य, वातुं. उत्वा, प्रवाय, वयत्–मान, वास्यत्–मान.

वेण् or वेन् (वेणृ / वेनृ)—Set 1 U गति—ज्ञान—चिंता–निशामन–वादित्र–ग्रहणेषु। to go, to know, to consider, to play on an instrument, to take, Caus Aor अविवेणत्—त, अविवेनत्—त.

वेथ् (वेथृ—Set) 1 A. याचने। to beg, to ask, Caus. Aor. अविवेथत्—त.

वेप् (टु–वेपृ–Set) 1 A. कंपने। to tremble, to shake, Caus. वेपयति, Aor. अविवेपत्

वेल् / वेळ् (वेलृ) Set 1 P. चलने। to go, to move, to shake, to tremble, Caus. वेलयति, Aor. अविवेलत्

वेष्ट् (वेष्ट—Set) 1 A. वेष्टने। to surround, to dress, Caus. Aor. अविवेष्टत्—त or अववेष्टत्—त

वेह् (वेहृ—Set) 1. A. प्रयत्ने। to endeavour, Caus. Aor. अविवेहत्–त.

वै (ओ–वै–Anit) 1 P. शोषणे । to be dry, to be languid, Act वायति, Caus वापयति–ते, but when meaning "to shake, to tremble" वाजयति–ते, Aor अवीवपत्–त or अविवजत्–त Desid. विवासति, Deri. वान, निर्वाण.

व्यथ् (घटादिः—Set) 1 A. भयचलनयोः । to be vexed, to fear, to become dry, Caus व्यथयति only Aor अविव्यथत्–त, Pass. Aor. अव्यथि—अव्याथि.

व्यय् (व्यय—Set) 1 U गतौ । to go, to move.

व्ये (व्येञ्—Anit) 1 U. संवरणे । to cover, to veil, Act. व्ययति—ते, विव्याय—विव्ये, विव्ययिथ, विव्यिषे, व्यातास्मि—हे, व्यास्यति–ते, अव्यास्यत्–त, अव्यासीत्–अव्यास्त, वीयासं—व्यासीय, Pass- वीयते, व्यास्यते or व्यायिष्यते, अव्यायि, Caus व्याययति–ते, अविव्ययत—त, Desid विव्यासति—ते Deri. वात, व्येय, व्यातुं. वीत्वा. संव्याय, परिव्याय or परिवीय.

व्रज् (Set) 1 P. गतौ । to go.

व्रण् (Set) 1 P. शब्दे । to sound, Aor. अव्रणीत् or अव्राणीत्.

शंक् (शकि—Set) 1 A शंकायाम् । to fear, to doubt, to suspect.

शच् (शच—Set) 1 A व्यक्तायाम्वाचि । to speak, to say, to tell.

शट् (Set) 1 P रुजाविशारणगत्यवसादेनषु । to be sick, to divide, to pierce, to go, to be weary, Aor अशटीत् or अशाटीत्.

शठ् (Set) 1 P. कैतवे । to cheat, to defraud, Aor. अशठीत् or अशाठीत्.

शण् (घटादि—Set) 1 P. दानेगतौच । to give, to go, Aor. अशणीत् or अशाणीत्, Caus शणयति—ते, Pass. Aor अशणि—अशाणि.

शड् (शडि—Set) 1 A. रुजायां संघातेच । to hurt, to cause disease, to collect.

शद् (शद्लृ—Anit) 1 P. (A in conjugational tenses) शातने । to perish, to fall, to wither, to decay शीयते, अशीयत, शीयतां, शीयेय, शशाद, शेदिथ, or शशत्थ, शत्तास्मि, शत्स्यति, अशत्स्यतां

अशदत्, शशास, Caus. शातयति-त, but शादयति-ते, meaning 'to cause to go' अशीशतत्-त, अशीशदत्-त Desid. शिशत्सति, Deri शन्न, शत्तुं, शत्वा, आशद्य, शीयमान.

शप् (शप्—Anit) 1 U. आक्रोशे । to curse, to imprecate, to swear. (A to conjure, to promise, to blame). शप्तास्मि—हे, शप्स्यति—ते, अशप्स्यत्—त, अशाप्सीत्—अशप्त, शप्यास, शप्सीय, Caus. शापयति—ते, अशीशपत्—त, Desid. शिशप्सति—ते, Deri शप्त, शप्य, शप्तुं, शप्त्वा

शर्ब् (Set) 1 P. गतौ । to go, to move.

शर्व् (Set) 1 P हिंसायाम् । to kill.

शल् (Set) 1 P गतौ । to go, to move.

शल् (शल—Set) 1 A. चलनसंवरणयो । to shake, to cover.

शल्भ् (शल्भ—Set) 1 A कत्थने । to praise, to boast

शव् (Set) 1 P गतौ । to go, to move, Aor. अशवीत्—अशावीत्.

शश् (Set) 1 P प्लुतगतौ । to jump, to dance, Aor. अशशीत् अशाशीत्

शष् (Set) 1 P. हिंसायाम् । to kill, Aor. अशषीत्, अशाषीत्.

शस् (शसु—Set) 1 P. हिंसायाम् । to kill, Aor अशसीत्, अशासीत्; Deri. शस्त, शस्त्वा, or शसित्वा.

शंस् (शंसु—Set) 1 P स्तुतौ दुर्गतौच । to praise, to be in distress, to tell, to indicate, Bene शस्यासं, Pass. शस्यते, Deri. शस्त. शस्य or शंस्य, शंसितुं, शंसित्वा or शस्त्वा, प्रशस्य.

शस् (आङ्शसि—Set) 1 A. always with आ. इच्छायाम् । to wish, to expect, to bless, Bene. आशंसिषीय, Pass. आशंस्यते, Deri. आशंसित.

शाख् (शाखृ-Set) 1 P. व्याप्तौ । to pervade, Caus. Aor. अशशाखत्-त.

शाड् (शाड़ृ—Set) 1 A श्लाघायाम् । to praise, Caus. Aor. अशशाडत—त

शान् (शान्—Set) 1 U तेजने । to whet, Act शीशांसति—ते, शीशांसांचकार—चक्रे, शीशांसितास्मि—हे.

शाल् (शालृ—Set) 1 A. श्लाघायांदीप्तौच । to praise, to shine, to be endowed with, to tell, Caus. Aor. अशशालत्—त.

शिक्ष् (शिक्ष—Set) 1 A. विद्योपादाने । to learn, to practise.

शिंख् (शिखि—Set) 1 P गतौ । to go, to move.

शिंघ् (शिघि—Set) 1 P. आघ्राणे । to smell.

शिट् (Set) 1 P. अनादरे । to disregard.

शिष् (considered Anit by Madhav and others but it is Set according to Bopadeo and others) 1 P हिंसायाम् । to kill, to leave as a remainder. शेषति, शेषितास्मि—शेष्टास्मि, शेषिष्यति-शेक्ष्यति.

शीक् (शीकृ—Set) 1 A. सेचने । to sprinkle, to wet, Caus. Aor. अशिशीकत्—त.

शीक् (Set) 1 P. आमर्षणे । to be angry, to touch, Caus. Aor. अशीशिकत्—त

शीभ् (शीभृ—Set) 1 A. कत्थने । to boast, Caus. Aor. अशिशीभत्-त.

शील् (Set) 1 P. समाधौ । to meditate, to intend.

शुच् (Set) 1 P. शोके । to regret, to grieve for, to bewail, Desid. शुशोचिषति or शुशुचिषति, Caus. Aor अशूशुचत्-त, Deri. शुचित or शोचित, शुचित्वा or शोचित्वा.

शुच्य् (Set) 1 P. स्नान-पीडन—सुरा-संधानेषु । to perform ablution, to squeeze out juice, to distil

शुट् } Set } 1 P. प्रतिघाते । to resist, to go lame.
शुंट् } शुठि }

शुंध् (Set) 1 P. शुद्धौ । to purify

शुभ् } Set { 1 P भाषणे भासने हिंसायांच । to speak, to shine, to
शुंभ् } { kill, Aor. अशोभीत्, Desid शुशुभिषति or शुशोभिषति, शुशुंभिषति.

शुभ् (शुभ—Set) 1 A दीप्तौ । to shine, to look beautiful, Aor. अशुभत् or अशोभिष्ट Desid शुशुभिषते or शुशोभिषते, Deri शुभित or शोभित, शुभित्वा or शोभित्वा.

D. 29

शूल् (Set) 1 P. रुजायासंघातेच । to be ill, to collect.

शूष् (Set) 1 P प्रसवे । to bring forth.

तप् (तप–Anit) 4 A. ऐश्वर्ये । to be powerful, to injure, to perform penance. तेपे, तप्ताहे, तप्स्यते, अतप्त, तप्सीय, Caus तापयति–ते, अतीतपत्-त, Desid. तितप्सते, Deri तप्त, तप्त्वा, तप्तुं तपान.

तम् (तमु–Set) 4 P. कांक्षायाम्—खेदेच । to desire, to be fatigued. ताम्यति, अताम्यत्, ताम्यतु, तताम, तेमिथ, तमितास्मि, अतमत्, तम्यासं, Caus तमयति—ते, अतीतमत्—त, Deri. तांत, तमित्वा or तांत्वा, तमितुं

तस् (तसु—Set) 4 P उपक्षये । to fade away, to become exhausted, Deri. तस्त, तसित्वा or तस्त्वा, तासितुं.

तिम् (Set) 4 P आर्द्रीभावे । to be wet, to be moist, Desid. तितिमिषति or तितेमिषति, Deri तिमित, तिमित्वा or तेमित्वा, तेमितुं.

तीम् (Set) 4 P. क्लेदने । to be wet or moist.

तुभ् (Set) 4 P. हिंसायाम् । to kill.

तुष् (Anit) 4 P. तुष्टौ । to be pleased or delighted तुतोष, तोष्टास्मि, तोक्ष्यति, अतोक्ष्यत्, अतुषत्, तुष्यासं, Deri. तुष्ट, तुष्ट्वा, परितुष्य, तोष्टुं.

तूर् (तूरी–Set) 4 P. गतित्वरणहिंसयो । to go quickly, to make haste, to hurt or kill, P. P. तूर्ण.

तृप् (Wet) 4 P. तृप्तौ । to be satisfied or pleased, to please or satisfy. ततर्प, ततर्पिथ or ततर्प्थ or तत्रप्थ, तर्पितास्मि, तर्प्तास्मि or त्रप्तास्मि, अतृपत, अताप्सीत्, अत्राप्सीत्, अतर्पीत्, तृप्यासं Caus Aor अततर्पत्—त, अतीतृपत्—त, Desid तितृप्सति, तितर्पिषति, Deri. तृप्त, तर्पित्वा, तृप्त्वा, तर्पितुं, तर्प्तुं, त्रप्तुं.

तृष् (ञि-तृषा—Set) 4 P. पिपासायां । to be thirsty, to wish, Caus. Aor. अतीतृषत्-त, अततर्षत्—त. Deri. तृषित, तर्षितुं, तृषित्वा or तर्षित्वा.

त्रस् (त्रसी–Set) 4 P. उद्वेगे । to fear, to tremble, Aor. अत्रसीत, अत्रासीत, Deri. त्रस्त, त्रसित्वा, त्रसितुं.

दम् (दमु—Set) 4 P उपशमे । to be quiet, to restrain, to tame, to subdue. दाम्यति, अदाम्यत्, दाम्यतु, दाम्येयं, Caus दमयते only. अदीदमत्, Deri. दमित, दांत, दमित्वा, दांत्वा, दमितुं, दमथु

दस् (दसु—Set) 4 P. उपक्षये । to perish, Deri. दस्त, दसित्वा, दस्त्वा, दसितुं

दिव् (दिव–Set) 4 P. क्रीडा–विजिगीषा–व्यवहार–द्युति—स्तुति—मोद—मद–स्वप्न–कांति–गतिषु । to play with dice or gamble, to desire; to overcome, to fraffic, to shine, to praise, to be glad, to be mad or drunk, to be sleepy, to wish for, to go दीव्यति, अदीव्यत्, दीव्यतु, दीव्येयं, दीव्यास; Pass दीव्यते, Desid दिदेविषति or दुद्यूषति, Deri. द्यून or द्यूत, देवितुं, देवित्वा or द्यूत्वा, दीव्यत्, देविष्यत्, दिदिवस्.

दी (दी–ङ्–Anit) 4 A. क्षये । to perish, to dacay दाताहे, दास्यते: अदास्यत, अदास्त, अदास्था , दासीय, Caus दापयति-ते, अदीदपत्-त, Desid. दिदीषते; Deri. दीन; दातव्य, दातुं, दीत्वा, प्रदाय, दिदीयान.

दीप् (दीपी-Set) 4 A. दीप्तौ । to shine, to burn, to be illustrious, Caus. Aor. अदीदिपत्-त or अदिदीपत्-त, Deri. दीप्त, दीपित्वा; दीपितुं.

दुष् (Anit) 4 P. वैकृत्ये । to be soiled, to be impure, to sin दोष्टास्मि, दोक्ष्यति, अदोक्ष्यत्-अदुषत्; दुष्यासं, Caus. दूषयति—ते, also दोषयति—ते, to make depraved, to corrupt, Desid दुदुक्षति, Deri. दुष्ट, दोष्टुं, दुष्ट्वा.

दू (दू-ङ्—Set) 4 A. परितापे । to suffer pain, to be sorry, to inflict pain, Caus. दावयति—ते, Deri दून, दाव्य, or दव्य, दवितुं; दूत्वा

दृप् (Wet) 4 P. हर्षमोहनयोः । to be glad, to be proud ददर्प, ददर्पिथ, or ददर्प्थ or दद्रप्थ; दर्पितास्मि or दर्प्तास्मि or द्रप्तास्मि, अदृपत्, अदर्पीत—अदार्प्सीत्, अद्राप्सीत्, Caus Aor अदीदृपत्-त or अददर्पत्—त, Desid दिदर्पिषति or दिदृप्सति, Deri दृप्त, दर्पित्वा or दृप्त्वा, दर्पितु or दर्प्तु or द्रप्तुं.

दो (Adit) 4 P अवखंडने । to cut, to mow द्यति, अद्यत्, द्यतु, देयं, Deri दित, दित्वा, दातुं, other forms are like those of दा 1 P. to give.

द्रुह (Wet) 4 P जिघांसायां । to bear hatred, to seek to hurt. दुद्रोह, दुद्रोहिथ or दुद्रोग्ध or दुद्रोढ, द्रोहितास्मि, द्रोग्धास्मि, द्रोढास्मि, द्रोहिष्यति or ध्रोक्ष्यति, अद्रुहत्, Desid दुद्रोहिषति or दुद्रुहिषति or दुध्रुक्षति, Deri. द्रुग्ध or द्रूढ, द्रोग्धव्य or द्रोढव्य or द्रोहितव्य, द्रोग्धुं or द्रोढुं or द्रोहितुं, द्रुग्ध्वा or द्रूढ्वा or द्रुहित्वा or द्रोहित्वा.

धी (धी—ङ्—Anit) 4 A. आधारे । to support, to hold, to despise धेताहे, धेष्यते, अधेष्ट, धेषीय, Caus धाययति-ते, Deri. धीन, धेतु, धीत्वा.

धूर् (धूरी-Set) 4 A. हिंसागत्योः । to kill, to go, P. P धूर्त.

नभ् (णभ्-Set) 4 P हिंसायाम् । to kill.

नश् (णश्—Wet) 4 P. अदर्शने । to disappear, to perish, to run away, to be unsuccessful ननाश, नेशिथ, or ननंष्ठ, नशितास्मि or नष्टास्मि, नाशिष्यति or नंक्ष्यति, अनशिष्यत् or अनंक्ष्यत्, नश्यासं, Caus. नाशयति only. Desid. निनाशिषति or निनंक्षति, Deri. नष्ट, नष्टुं or नशितुं, नष्ट्वा or नंष्ट्वा or नशित्वा.

नह् (णह्—Anit) 4 U. बंधने । to tie, to arm or to put on oneself (mostly A. in the last sense) नद्धास्मि—हे, नत्स्यति—ते, अनात्सीत्—अनद्ध, नह्यासं, नत्सीय, Deri. नद्ध, नद्धुं, नद्ध्वा.

नृत् (नृती—Set) 4 P गात्रविक्षेपे । to dance, to jesticulate. नर्तितास्मि, नर्तिष्यति or नर्त्स्यति, अनर्तिष्यत् or अनर्त्स्यत्, Caus नर्तयते only Caus Aor. अननर्तत, or अनीनृतत, Desid. निनर्तिषति or निनृत्सति, Deri. नृत्त, नृत्य or नर्त्य, नर्तितुं, नर्तित्वा.

पत् (पत—a Vedic root—Set) 4 A. ऐश्वर्ये । to be master of, to rule, to possess, to be fit for.

पद् (पद्–Anit) 4 A गतौ । to go, to attain, to observe पत्ताहे, पत्स्यते, अपत्स्यत, अपादि, अपत्सत, पत्सीय, Desid पित्सते, Deri. पन्न, पत्त्वा, पत्तुं, प्रपद्य.

पी (पी–ङ्—Anit) 4 A पाने । to drink. Caus पाययति—ते

पुथ् (Set) 4 P हिंसायाम् । to kill

पुष् (Anit) 4 P पुष्टौ । to nourish, to support, to develop, to increase, to possess पोष्टास्मि, पोक्ष्यति, अपोक्ष्यत्, अपुक्षत्, Deri. पुष्ट, पोष्टुं, पुष्ट्वा, पोष्य.

पुष्प् (Set) 4 P. विकसने । to blow, to flower.

पूर् (पूरी—Set) 4 A आप्यायने । to fill, to satisfy, to be full, to be satisfied, Aor. अपूरिष्ट or अपूरि, Deri. पूर्ण or पूर्त.

प्री (प्री—ङ्—Anit) 4 A. प्रीतौ । to please, to be satisfied, to feel affection for प्रेताहे, प्रेष्यते, अप्रेष्ट, Caus. प्राययति—ते.

प्लुष् (Set) 4 P दाहे । to burn, to scorch, Desid पुप्लुषिषति or पुप्लोषिषति, Deri प्लोषित्वा or प्लुषित्वा.

बस् (बसु–Set) 4 P. स्तंभे । to stop.

* बिस् (Set) 4 P क्षेपे—प्रेरणेच । to throw, to instigate, to go, to split, to grow.

बुध् (बुध—Anit) 4 A बोधने । to know, to understand, to awake, to be restored to one's senses. बोद्धाहे, भोत्स्यते, अभो

त्स्यत, अबुद्ध or अबोधि, भुत्सीय, Caus. बोधयति, अबूबुधत्, Deri. बुद्ध, बोद्धुं, बुद्ध्वा, प्रबुध्य.

बुस् (Set) 4 P. उत्सर्गे । to discharge, to emit.

व्युस् (Set) 4 P विभागे । to divide.

भृश् (भृशु—Set) 4 P. अध पतने । to fall down, Deri. भृष्ट, भ्रशित्वा or भृष्ट्वा, भर्शितुं.

भ्रम् (भ्रमु—Set) 4. P. अनवस्थाने । to be unsteady, to wander, to totter. भ्राम्यति, अभ्राम्यत्, भ्राम्यतु, भ्राम्येय, Aor अभ्रमत् Pre P. भ्राम्यत्, (other forms like those of भ्रम् 1 P.)

भ्रंश् (भ्रंशु—Set) 4 P. अध पतने । to fall down, to decrease, to escape भ्रश्यति, अभ्रश्यत्, भ्रश्यतु, भ्रश्येयं, अभ्रशत्, भ्रश्यासं, Deri भ्रश्यत्, भ्रष्ट, भ्रंशित्वा or भ्रष्ट्वा, भ्रशितुं.

मद् (मदी–घटादि –Set) 4 P. हर्षग्लेपनयो । to rejoice, to be poor or distressed, to be intoxicated or mad माद्यति, अमाद्यत्, माद्यतु, माद्येयं, Caus. मदयति—ते, also मादयति—ते, (to madden, to inebriate). Deri. मत्त, मदित्वा, मदितुं.

मन् (मन—Anit) 4 A ज्ञाने । to think, to suppose, to regard as, to esteem, to honour, to know. मन्ताहे, मंस्यते, अमंस्यत, अमंस्त, मंसीय, Caus. मानयति—ते, Deri मत, मंतुं, मत्वा, मान्य.

मस् (मसी–Set) 4 P. परिमाणे । to measure, to charge for, Deri. मस्त, मासित्वा, मसितुं.

मा (मा—ङ्–Anit) 4 A. माने । to measure.

मिद् (ञि–मिदा–Set) 4 P. स्नेहने । to be greasy, to be soft, to melt, Desid. मिमिदिषति or मिमेदिषति.

मी (मी—ङ्—Anit) 4 A. हिंसायाम् प्राणवियोगेच्च । to die, to perish, to kill, to hurt, Caus. माययति–ते Deri. मीन, मेतुं, मीत्वा.

मुष / मुस् { Set } 4 P खंडने । to destroy, to break, to steal, Desid मुमुषिषति or मुमोषिषति, Deri. मोषित, मोषितुं, मोषित्वा or मुषित्वा.

मुह् (Wet) 4 P. वैचित्त्ये । to loose sense, to faint, to be bewildered, to err, to be foolish मुमोह, मुमोहिथ or मुमोढ or मुमोग्ध, मोहितास्मि or मोग्धास्मि or मोढास्मि, मोहिष्यति or मोक्ष्यति, अमोहिष्यत् or अमोक्ष्यत्, अमुहत्, मुह्यास्तं. Caus मोहयति-ते but परिमोहयते only. Desid मुमुहिषति or मुमोहिषति or मुमुक्षति; Deri. मुग्ध or मूढ, मोहितव्य or मोग्धव्य or मोढव्य; मोहितुं or मोग्धुं or मोढुं, मोहित्वा or मुहित्वा or मुग्ध्वा or मूढ्वा

मृग् (Set) 4 P. अन्वेषणे । to seek, to hunt.

मृष् (मृषं—Set) 4 U तितिक्षायाम् । to bear, to endure, to suffer; to allow. Desid, मर्षित, मृषित्वा or मर्षित्वा.

यस् (यसु—Set) 4 P. प्रयत्ने । to strive, to endeavour, to labour, Caus यासयति-ते, but आयासते only Deri यस्त, यसितुं, यसित्वा or यस्त्वा.

युज् (युज-Anit) 4 A. समाधौ चित्तवृत्तिनिरोधे । to meditate, to curb one's mind, to concentrate the mind योक्ताहे, योक्ष्यते; अयुक्त, Caus योजयति Deri. युक्त; योग्य or योज्य, योक्तुं; युक्त्वा.

युध् (युध-Anit) 4 A. संप्रहारे । to fight, to contend with. योद्धाहे; योत्स्यते, अयोत्स्यत, अयुद्ध; युत्सीय; Caus. योधयति only. Deri. युद्ध, योद्धुं, युद्ध्वा.

युप् (युपु—Set) 4 P विमोहने । to confuse, Deri. युप्त, युपित्वा or योपित्वा or युप्त्वा, योपितुं.

रंज् (रंजं-Anit) 4 U. रज्जति-ते, अरज्जत्—त, रज्जतु-तां, रज्येयं—य.

रध् (Wet) 4 P. हिंसा-संराध्योः । to kill, to injure, to cook, to finish ररंध, रधितास्मि or रद्धास्मि; रधिष्यति or रत्स्यति, अरधिष्यत् or अरत्स्यत्, अरधत्, रध्यास्तं, Caus रंधयति—ते; अररंधत्-त; Desid. रिरधिषति or रिरत्सति; Deri. रद्ध; रधितुं or रद्धुं, रधित्वा or रद्ध्वा.

राध् (Anit) 4 P वृद्धौ । to grow, to be ready, to be favourable, to look to the welfare of. राद्धास्मि, रात्स्यति, अरात्स्यत्; अरात्सीत्; Deri. राद्ध, राद्धुं; राद्ध्वा.

रिष् (Set) 4 P. हिंसायाम् । to kill, to destroy.

री (रि—ङ्–Amt) 4 A. स्रवणे । to ooze, to flow, Caus. रेपयति—ते, Deri रीण, रेतुं, रीत्वा.

रुध् (with अनु. रुध–Amt) 4 A. कामे । to desire, to love, to comply with, to obey रोद्धाहे, रोत्स्यते, अरुद्ध; रुत्सीय, Deri. रुद्ध, रोद्धुं.

रुप् (रुपु—Set) 4 P. विमोहने । to violate, to confound, to disturb, Desid. रुरुपिषति or रुरोपिषति; Deri. रुप्त, रुपित्वा or रोपित्वा or रुप्त्वा.

रुष् (Set) 4 P हिंसायाम् । to kill.

लिश् (लिश–Amt) 4 A. अल्पीभावे । to decrease, to become small. लेष्टाहे; लेक्ष्यते, अलेक्ष्यत, अलिक्षत.

ली (ली–ङ्–Amt) 4 A श्लेषणे । to adhere to, to be absorbed, to be dissolved, to hide in, to rest on, to disappear लेताहे or लाताहे; लेष्यते or लास्यते; अलेष्यत or अलास्यत, अलेष्ट or अलास्त, लेषीय or लासीय, Caus लाययति—ते or लापयति—ते but विलाययति—ते or विलीनयति—ते or विलापयति—ते or विलालयति—ते, Deri. लीन, लेतुं or लातुं; लीत्वा, विलाय or विलीय.

लुट् (Set) 4 P. विलोडने । to churn, to agitate, to roll, to wallow, to be connected with.

लुप् (लुपु—Set) 4 P. विमोहने । to be confused. to vanish Desid. लुलुपिषति or लुलोपिषति: Deri लुप्त; लोपितुं, लुप्त्वा or लुपित्वा or लोपित्वा.

लुभ् (Set) 4 P. गार्ध्ये । to covet, to long for, to allure लोभितास्मि or लोब्धास्मि, Desid. लुलुभिषति or लुलोभिषति; Deri. लुब्ध, लोभितुं or लोब्धुं, लुब्ध्वा or लुभित्वा or लोभित्वा.

वस् (वसु—Set) 4 P. स्तंभे । to fix, to be straight, Deri. वस्त वसित्वा or वस्त्वा, वसितु.

वावृत् (वावृतु—Set) 4 A. वरणे । to choose. Deri. वावृत्त, वावर्तित्वा or वावृत्त्वा, वावर्तितुं.

वाश् (वाशृ—Set) 4 A. शब्दे । to howl, to growl, to roar, Caus. Aor. अववाशत्—त.

विद् (विद्–Anit) 4 A सत्तायां । to be, to exist. वेत्ताहे, वेत्स्यते, अवित्त, वित्सीय, Desid. विवित्सते, Deri. विन्न, वित्त्वा, वेत्तुं.

विस् (Set) 4 P प्रेरणे । to send.

बुस् (Set) 4 P. विभागे । to divide.

वृत् (वृतु–Set) 4 A. वरणे । to choose, to like.

वृश् (Set) 4 P वरणे । to choose, to like.

व्यध् (Anit) 4 P ताडने । to strike to hurt, to stab, to pierce, विध्यति, अविध्यत्, विध्यतु, विध्येयं, विव्याध, विव्यधिथ or विव्यद्ध, व्यद्धास्मि, व्यत्स्यति, अव्यत्स्यत्, अव्यात्सीत्, विध्यासं, Pass विध्यते, Desid विव्यत्सति, Deri विद्ध, विद्ध्वा

व्युष् (Set) 4 P. विभागेदाहेच । to divide, to burn, Aor अव्युषत्, In the last sense अव्योषीत्.

व्री (व्री–ङ्—Anit) 4 A वरणे । to choose, P. P. व्रीण

व्रीड् (Set) 4 P चोदनेलज्जायांच । to throw, to be ashamed

शक् (शकॢ—Set) 4 U मर्षणे । to endure, to be able शकितास्मि–हे or शक्तास्मि—हे, शकिष्यति—ते or शक्ष्यति–ते, अशकिष्यत्—त or अशक्ष्यत्–त, अशकत्, अशकिष्ट or अशक्त, शक्यासं—शकिषीय, or शक्षीय,, Desid. शिशकिषति—ते or शिक्षति–ते, Deri शकित or शक्त, शकितुं or शक्तुं, शकित्वा or शक्त्वा, शेकिवस्–शेकान.

शप् (शप Anit) 4 U आक्रोशे । to curse, to swear

शम् (शमु—घटादि -Set) 4 P. उपशमे । to be calm, शाम्यति, अशाम्यत्, शाम्यतु, शाम्येयं, Caus. शमयति–ते or शामयति–ते, (but with नि–निशामयति—ते only) Deri. शांत, शम्य or शाम्य, शांत्वा or शमित्वा, शमितुं.

शुच् (शुचिर्—Set) 4 U. पूतिभावे (क्लेदे) । to be wet, to be clean, Aor. अशुचत् or अशोचीत्, अशोचिष्ट, Desid शुशुचिषति—ते or शुशोचिषति—ते, Deri. शुक्त, शुचित्वा or शोचित्वा, शोचितुं.

शुध् (Anit) 4 P शौचे। to become pure, to be made clear, शोद्धास्मि, शोत्स्यति, अशोत्स्यत, अशुधत्, शुध्यासं, Desid. शुशुत्साति, Deri. शुद्ध.

शुष् (Anit) 4 P. शोषणे। to become dry, to be withered, शोष्टास्मि, शोक्ष्यति, अशोक्ष्यत्, अशुषत्, शुष्यास, Desid. शुशुक्षति, Deri. शुष्क, शोष्टुं, शुष्ट्वा.

शूर् (शूरी—Set) 4 A. हिंसा-स्तंभनयो। to strike, to be firm, P. P. शूर्ण.

शो (Anit) 4 P तनूकरणे। to whet, to make thin, श्यति, अश्यत्, श्यतु, श्येयं, शशिथ or शशाथ, शातास्मि, शास्यति, अशास्यत्, अशात् or अशासीत्, शायासं, Pass. शायते, Desid शिशासति, Deri. शित or शात, शंसित (well finished), शातुं, शात्वा or शित्वा.

श्रम् (श्रमु—Set) 4 P तपसिखेदेच। to perform acts of penance, to be fatigued, श्राम्यति, अश्राम्यत्, श्राम्यतु, श्राम्येयं, Caus श्रमयति—ते or श्रामयति—ते, Deri श्रांत, श्रमित्वा or श्रांत्वा, श्रमितुं

श्लिष् (Anit) 4 P आलिंगने। to embrace, to adhere to, to unite, श्लेष्टास्मि, श्लेक्ष्यति, अश्लेक्ष्यत, अश्लिषत्. In the first sense, अश्लिक्षत.

ष्ठिव् (ष्ठिवु—Set) 4 P निरसने। to spit, ष्ठीव्यति, अष्ठीव्यत, ष्ठीव्यतु, ष्ठीव्येय, (other forms are like those of ष्ठिव् 1 P).

सम् (षमी—Set) 4 P परिणामे। to change form, P. P सांत

सह् (षह्—Set) 4 P. तृप्तौ। to satisfy, to be pleased, सहितास्मि, सहिष्यति, असहिष्यत्, असहीत्, Deri. सहित, सहितुं, सहित्वा.

सिध् (षिधु—Anit) 4 P संराद्धौ। to be accomplished, to succeed, to be thoroughly prepared सेद्धास्मि, सेत्स्यति, असेत्स्यत्, असिधत्, Caus साधयति—ते, also सेधयति—ते, to cause to ascertain the truth, Desid सिषित्साति, Deri सिद्ध, सेद्धु, सिध्द्वा.

सिव् (षिवु-Set) 4 P तंतुसंताने। to sew, to sow (as seed) सीव्यति, असीव्यत्, सीव्यतु, सीव्येयं, Desid. सिसेविषति or सुस्यूषति, Deri. स्यूत, सेवित्वा or स्यूत्वा, सेवितुं

तुह् (षुह्—Set) 4 P. तृप्तौ । to be satisfied.

सू (षू-ङ्-Wet) 4 A. प्राणिगर्भविमोचने । to bring forth as a child, P P सून.

सृज् (सृज—Anit) 4 A विसर्गे । to be abandoned, to drop, स्रष्टाहे, स्रक्ष्यते, असृष्ट, सृक्षीय, Caus. Aor. अससर्जत्—त or असीसृजत् —त, Desid सिसृक्षते, Deri. सृष्ट, स्रष्टुं, सृष्ट्वा.

सो (षो-Anit) 4 P अंतकर्मणि । to put an end to, to kill, to finish, स्यति, अस्यत्, स्यतु, स्येयं, असात् or असासीत्, सेयासं, Pass. सीयते, Caus. साययति-ते, Desid. सिषासति, Deri. सित, सातुं, सित्वा.

स्तिम् } ष्टिम् } (Set) 4 P. आर्द्रिभावे to become wet, to moist
स्तीम् } ष्टीम् }

स्तूप् (ष्टूप्—Set) 4 P. समुच्छ्राये । to pile, to collect, to erect.

स्नस् (ष्णसु—Set) 4 P निरसने । to reject, to eject, Aor. अस्नसीत् or अस्नासीत् Caue. स्नसयति—ते or स्नासयति-ते (according to some) Deri स्नस्त, स्नसित्वा, or स्नस्त्वा, स्नसितु.

स्निह् (ष्णिह्—Wet) 4 P स्नेहे । to feel affection for, to love, to be kind to, सिष्णेह, सिष्णेहिथ, or सिष्णेढ or सिष्णेग्ध, स्नेहितास्मि or स्नेढास्मि or स्नेग्धास्मि, स्नेहिष्यति or स्नेक्ष्यति, अस्निहत्, Desid. सिस्निक्षति or सिस्निहिषति or सिस्नेहिषति, Deri. स्निग्ध or स्नीढ, स्निहित्वा or स्नेहित्वा or स्निग्ध्वा or स्नीढ्वा, स्नेहितुं, स्नेढु, or स्नेग्धुं.

स्नुस् (ष्णुसु—Set) 4 P. अदने । आदान इत्येके । अदर्शन इत्यपरे । to eat, to take, to disappear, Deri. स्नुस्त, स्नुसित्वा or स्नुस्त्वा, स्नोसितुं.

स्नुह् (ष्णुह्—Wet) 4 P उद्गिरणे । to vomit.

स्रिव् (स्रिवु—Set) 4 P गतिशोषणयो. । to go, to dry, स्रीव्यति, अस्रीव्यत्, स्रीव्यतु, स्रीव्येयं, Desid. सिस्रेविषति or सुस्रूषति, Deri. स्र्यूत स्रेवित्वा or स्रिवित्वा or स्र्यूत्वा, स्रेवितुं

स्विद् (ञिष्विदा—Anit) 4 P गात्रप्रक्षरणे । to perspire, स्वेत्तास्मि, स्वेत्स्यति, अस्वेत्स्यत्, अस्विदत् Desid. सिस्वित्सति, Deri स्विन्न, स्वित्त्वा, स्वेत्तुं.

हृष (Set) 4 P. तुष्टौ । to rejoice, to exult, to stand erect as hair Caus. Aor. अजहर्षत्—त or अजीहृषत्—त, Deri हृष्ट or हृषित, हर्षितुं, हर्षित्वा.

॥ अथ श्नु-विकरणः स्वादिगणः पञ्चमः ॥



अश् (अंशू—Wet) 5 A. व्याप्तौसंघातेच । to pervade, to heap, to obtain, to go to, अश्नुते, अश्नुवते, आश्नुत, अश्नुतां, अश्नुवीय, आनशे, आनशिषे or आनक्षे, अशिताहे or अष्टाहे, अशिष्यते or अक्ष्यते, आशिष्यत or आक्ष्यत, आशिष्ट or आष्ट, अशिषीय or अक्षीय, Deri अष्ट, अशितुं or अष्टुं, अशित्वा or अष्ट्वा

अह् (a Vedic root—Set) 5 P व्याप्तौ । to pervade, अह्नोति.

आप् (आप्लृ—Anit) 5 P व्याप्तौ । to pervade, to obtain, to occupy, to reach, आप्नोति, आप्नुवंति, आप्नोत्, आप्नोतु, आप्नुया, आप आपिथ, आप्तास्मि, आप्स्यति, आप्स्यत्, आपत् Desid ईप्सति, Deri आप्त, आप्तुं, आप्त्वा.

ऋ (a Vedic root—Anit) 5 P हिंसायाम् । to kill, ऋणोति.

ऋक्षि (a Vedic root—Set) 5 P हिंसायां । to kill, ऋक्षिणोति.

ऋध् (ऋधु-Set) 5 P. वृद्धौ । to increase, to prosper, to please, ऋध्नोति, आर्ध्नोत्, ऋध्नोतु, आर्धीत्, non-conjugational forms are like those of ऋध 4 P.

क्षि (a Vedic root—Anit) हिंसायां । to kill, क्षिणोति, क्षिणुवः-क्षिण्वः, अक्षिणोत, क्षिणोतु, क्षिणुयां, non-conjugational forms are like those of क्षि 1 P.

कृ (कृं—ञ्-Anit) 5 U हिंसायां । to kill, कृणोति—कृणुते, कृण्वंति-कृण्वते, कृणुव -कृण्व., अकृणोत्-अकृणुत, कृणोतु-कृणुतां, कृणु—कृणुष्व, कृणुयां—कृण्वीय, चकार—चक्रे, कर्तास्मि-हे, करिष्यति—ते, अकरिष्यत्-त, अकार्षीत्, अकृत, क्रीयास-कृषीय, Pass क्रीयते, Caus. कारयति—ते, Desid चिकीर्षति-ते, Deri. कृत, कर्तुं, कृत्वा.

चम् (चमु—a Vedic root—Set) 5 P. भक्षणे , to eat, चम्नोति.

चि (चि—ञ्—Anit) 5 U. चयने । to collect, to cover, चिनोति—चिनुते, चिनुवः-चिन्व , चिनुवहे-चिन्वहे, अचिनवं, अचिन्वि, अचिनोत् , अचिनुत, चिनोतु, चिनुतां, चिनुयां, चिन्वीय, चेतास्मि—हे, चेष्यति—ते, अचेष्यत्—त, अचैषीत् , अचेष्ट, चीयासं, चेषीय, Pass. चीयते, Caus चाययति—ते or चापयति—ते, Desid. चिचीषति—ते or चिकीषति—ते, Deri चित, चेतुं, चित्वा.

चिरि, जिरि { Vedic roots—Set } 5 P हिंसायाम् । to kill, चिरिणोति, जिरिणोति.

तिक्, तिग् { Set } 5 P. आस्कदन—गति—वधेषु । to assail, to go, to seek, to injure or kill, to challenge, तिक्नोति, तिग्नोति.

तिघ् (Set) 5 P हिंसायाम् । to kill, to challenge, तिघ्नोति.

तृप् (Set) 5 P. प्रीणने । to please or to be pleased, तृप्नोति, Caus Aor अततर्पत्—त or अतीतृपत्—त.

दघ् (a Vedic root—Set) 5 P. घातनेपालनेच । to destroy, to protect, दघ्नोति, Aor. अदघीत् or अदाघीत्.

दंभ् (दंभु—Set) 5 P दंभने । to deceive, to injure, दभ्नोति, अदभ्नोत्, दभ्नोतु, दभ्नुयाम्, ददभ, दभितास्मि, दभिष्यति, अदभीत्, दभ्यासं. Pass दभ्यते, Desid धिप्सति or धीप्सति or दिदंभिषति, Deri दब्ध, दंभितुं, दब्ध्वा, or दंभित्वा.

दाश्(a Vedic root–Set) 5 P. हिंसायां । to kill, दाश्नोति

दु (टु–दु–Anit) 5 P. उपतापे । to give pain, to burn, to be distressed, दुनोति, दुदाव, दुदविथ-दुदोथ, दोतास्मि, दोष्यति, अदौषीत्–दूयासं, Pass दूयते, Deri. दुत, दोतुं, दुत्वा.

दृ (a Vedic root—Anit) 5 P हिंसायाम् to kill, दृणोति, ददार, दर्तास्मि, दरिष्यति, अदार्षीत्, द्रियासं

धु (धुं—ञ्—Anit) 5 U. कंपने । to shake; to tremble, धुनोति, धुनुते, दुधाव, दुधुवे; धोतास्मि-हे; धोष्यति—ते, अधौषीत्-अधोष्ट; धूयासं-धोषीय, Caus. धावयति only.

धू (धूँ ञ्—Wet) 5 U कंपने। to shake, to excite, to kindle, to treat roughly, धूनोति, धूनुते, धोतास्मि—हे or धवितास्मि-हे, Deri. धूत, धोतुं, धवितुं, धूत्वा.

धृष् (ञि—धृषा—Set) 5 P. प्रागल्भे। to be bold, confident, impudent or impatient, to challenge; धृष्णोति Caus. Aor. अदीधृषत्—त or अददधर्षत्—त, Deri धर्षित or धृष्ट, धर्षितुं-धर्षित्वा.

पृ (a Vedic root—Anit) 5 P. प्रीतौ। to please, पृणोति.

मि (डु-मिं-ञ्-Anit) 5 U प्रक्षेपणे। to throw, to scatter, Deri. मित, मित्वा, मातुं, मित्रिम (मयनेननिवृत्तम्).

राध् (Anit) 5 P संसिद्धौहिंसायांच। to accomplish, to kill, to propitiate राध्नोति

रि (a Vedic root—Anit) 5 P. हिंसायां। to kill. रिणोति.

वृ (वृं-ञ्—Set) 5 U वरणे। to choose, to solicit to cover, to surround, to restrain वरि(री)तास्मि-हे, अवारीत्, अवरि(री)ष्ट, Desid विवरि(री)षति-ते or वुवूर्षति—ते, Deri वृत, वरि(री)-तु, वृत्वा.

शक् (शक्लृ—Anit) 5 P. शक्तौ। to be able; to be powerful, to bear, शक्नोति, शशाक, शेकुः शक्तास्मि, शक्ष्यति, अशकत् Desid. शिक्षति, Deri शक्त, शक्तुं, शक्त्वा.

शि (शिं-ञ्—Anit) 5 U निशाने। to whet, to excite.

सघ् (षघ्—Set) 5 P. हिंसायां। to kill, Aor. असघीत्, असाघीत्.

साध् (षाध्—Anit) 5 P. संसिद्धौ। to accomplish साध्नोति, साद्धास्मि, सात्स्यति Desid सिषात्सति.

सि (षिं—ञ्—Anit) 5 U बंधने। to tie, P. P. सित, सिन (mouthful), सित्वा, सेतुं

सु (षुं—ञ्—Anit) 5 U. स्नपन—पीडन-स्नान—सुरा—संधानेषु। to cause to bathe to churn, to pour out, to bathe, to press out juice, to distil.


स्तिघ् (ष्टिघ—Set) 5 A आस्कंदने। to ascend, to assail

स्तृ (स्तु-ञ्-Anit) 5 U. आच्छादने । to cover.

स्पृ (a Vedic root-Anit) 5 P. प्रीति—पालनयो —प्रीतिचलनयो-रित्यन्ये । to gratify, to defend, to shake.

स्मृ (a Vedic root—Anit) 5 P. चितायां । to remember; to recollect.

हि (Anit) 5 P. गतौ वृद्धौच । to go, to grow.



॥ अथ श–विकरणस्तुदादिगणः षष्ठः ॥

इल् (Set) 6 P स्वप्नक्षेपणयोः । to sleep, to throw. इलति, इयेल, एलितास्मि, एलिष्यति, ऐलिष्यत्, ऐलीत्, इल्यासं, इलित, एलित्वा, एलितु.

इष् (Set) 6 P इच्छायाम् । to wish इच्छति, इयेष, एषितास्मि, or एष्टास्मि Deri इष्ट, एषितुं or एष्टुं, एषित्वा or इष्ट्वा, इच्छत्, ईषिवस्.

उज्झ् (Set) 6 P उत्सर्गे । to abandon; to leave

उंछ् (उच्छि–Set) 6 P उंछे । to glean.

उब्ज् (Set) 6 P. आर्जवे । to make straight

उभ्, उंभ् { Set } 6 P पूरणे । to fill with.

ऋच् (Set) 6 P. स्तुतौ । to praise, ऋचति, आनर्च, अर्चितास्मि, अर्चिष्यति, आर्चिष्यत्, आर्चीत्, ऋच्यासं, Desid. अर्चिचिषति, Deri ऋचित, अर्चितुं, अर्चित्वा.

ऋच्छ् (Set) 6 P. गतीन्द्रियप्रलयमूर्तिभावेषु । to go, to fail in faculties; to become hard or congeal, (A with सं) ऋच्छति, (with प्र or सं प्रार्च्छति समृच्छते) आनर्छ, ऋच्छितास्मि, ऋच्छिष्यति, आर्च्छिष्यत्, आर्च्छीत्, ऋच्छ्यासं, (समृच्छिताहे, समार्च्छिष्यते, समार्च्छिष्ट, समृच्छिषीय) Pass. ऋच्छ्यते.

ऋफ् } Set } 6 P. हिंसायां । to kill
ऋंफ्

ऋष् (ऋषी—Set) 6 P. गतौ । to go or approach. ऋषति, (with प्र, प्रार्षति).

कड् (Set) 6 P मदे । to be proud

किल्. (Set) 6 P. श्वैत्यक्रीडनयो. । to become white, to sport किलति.

कु (कु-ङ्-कुटादि —Anit) 6 A. आर्तस्वरे । to moan, कुवते, अकुवत्, कुवतां, चुकुवे, कुताहे, कुष्यते, अकुष्यत, अकुत, कुषीय, Pass कूयते.

कुच् (कुटादि-Set) 6 P संकोचने । to contract, to shrink, to be crooked, (generally with सं).

कुट् (कुटादि –Set) 6 P कौटिल्ये । to be crooked, to bend

कुड् (कुटादि.–Set) 6 P बाल्येसंघातेच । to act as a child, to heap

कुण् (Set) 6 P शब्दोपकरणयो । to sound, to support with gifts

कुर् (Set) 6 P शब्दे । to sound, कुरति, Bene कूर्यास

कू (कू-ङ्-कुटादि —Set) शब्दे । 6 A to sound, to groan, कुवते, अकुवत, कुवतां, चुकुवे, कुविताहे, कुविष्यते, अकुविष्ट, कुविषीय, Pass कूयते.

कूड् (Set) 6 P. दार्ढ्येभक्षणेच । to become firm, to eat

कृड् (कुटादि —Set) 6 P घनत्वे । to become thick, कृडति.

कृत् (कृती—Set) 6 P छेदने । to cut, कृंतति, अकृंतत्, कृंततु, कृंतेय, चकर्त, कर्तितास्मि, कर्तिष्यति or कर्त्स्यति, अकर्तिष्यत or अकर्त्स्यत्. अकर्तीत्, कृत्यासं, Caus Aor अचीकृतत्-त, अचकर्तत्-त, Desid चिकर्तिषति or चिकृत्सति, Deri कृत्त, कर्तितुं, कर्तित्वा.

कृष् (कृष-Anit) 6 U विलेखने । to draw, to plough कृषति—ते, कर्ष्टास्मि—हे or क्रष्टास्मि—हे, कर्क्ष्यति-ते or क्रक्ष्यति-ते, अकार्क्षीत् or अक्राक्षीत्, अकृक्षत or अकृष्ट.

कॄ (Set) 6 P विक्षेपे । to scatter; to throw, (A. with अप to scratch the ground for food or abode), किरति, अकिरत्,

किरतु, चकार, करि(री)तास्मि, करि(री)ष्यति, अकरि(री)ष्यत्, अकारीत्, कीर्यासं, Pass कीर्यते, Caus. कारयति—ते, Desid. चिकरिषति only, Deri. कीर्ण, करि(री)तुं, करि(री)त्वा.

कुड् (कुटादि.–Set) 6 P निमज्जनेघनिभावेच। to sink, to become thick, कुडति

क्षि (Anit) 6 P. निवासगत्योः to dwell; to go.

क्षिप् (क्षिप–Anit) 6 U. प्रेरणे। to throw.

क्षुर् (Set) 6 P. विलेखने। to scratch.

खिद् (Anit) 6 P. परिघाते परितापेच। to strike, to afflict, to be displeased खिंदति, अखिंदत्, खिंदतु, चिखेद, खेत्तास्मि, खेत्स्यति, अखेत्स्यत्, अखैत्सीत्, खिद्यासं, Deri. खिन्न.

खिल् (Set) 6 P उंछे। to glean.

खुड् (कुटादि —Set) 6 P. संवरणे। to cover

खुर् (Set) 6 P छेदने। to cut.

गु (कुटादि –Anit) 6 P पुरीषोत्सर्गे। to void or discharge excrement. गुवति, Deri. गून.

गुज् (कुटादि —Set) 6 P. शब्दे। to sound. गुजति.

गुड् (कुटादि.—Set) 6 P. रक्षणे। to protect. गुडति

गुफ्, गुंफ् { Set } 6 P. ग्रंथे। to string together

गुर् (गुरी–कुटादि.—Set) 6 A. उद्यमने। to make an effort. Pass. गूर्यते, Desid. जुगुरिषते or जुगोरिषते. Deri. गूर्ण.

गॄ (Set) 6 P निगरणे। to swallow, गिरति or गिलति, अगिरत्—अगिलत्, गिरतु–गिलतु, गिरेयं or गिलेयं, जगार–जगाल, गरि(री)–तास्मि—गलि(ली)तास्मि, गरि(री)ष्यति, गलि(ली)ष्यति, अगारीत्, अगालीत्, गीर्यासं, Pass. गीर्यते, Caus गारयति–गालयति only. Deri. गीर्ण, गीर्त्वा, गरि(री)तुं, गलि(ली)तुं

घुट, घुड् { कुटादि —Set } 6 P. प्रतिघाते। to strike against.

घुण् (Set) 6 P भ्रमणे । to roll.

घुर् (Set) 6 P भीमार्थशब्दयो । to frighten, to sound.

घूर्ण् (Set) 6 P भ्रमणे । to roll, to whirl.

चल् (Set) 6 P विलसने । to play, to amuse oneself

चिल् (Set) 6 P वसने । to dress. चिलति.

चुट् (कुटादि —Set) 6 P छेदने । to cut. चुटति

चुड् (कुटादि.–Set) 6 P संवरणे । to conceal चुडति.

चृत् (चृती–Set) 6 P हिंसाग्रंथनयो । to kill, to hurt, to connect together, चृंतति, अचृतत्, चृंततु, चृतेयं, चचर्त, चर्तितास्मि, चर्तिष्यति or चर्त्स्यति, अचर्तिष्यत् or अचर्त्स्यत्, अचर्तीत–चृत्यासं, Caus. Aor अचीचृतत्—त or अचचर्तत्–त, Desid. चिचर्तिषति or चिचृत्सति Deri चृत, चर्तितु, चर्तित्वा.

छुट् (कुटादि —Set) 6 P भेदने । to cut, छुटति

छुड् (कुटादि —Set) 6 P. संवरणे । to cover, छुडति.

छुप् (Set) 6 P. स्पर्शे । to touch, छुपति.

छुर् (कुटादि –Set) 6 P भेदने । to cut, to engrave, to envelop.

जर्ज् (Set) 6 P परिभाषण—हिंसा–तर्जनेषु । to say; to blame, to kill, to reprove.

जुट् (कुटादि –Set) 6 P बंधने । to bind, जुटति.

जुड् / जुन् { Set } 6 P गतौ । to go, जुडति, जुनति.

जुष् (जुषी—Set) 6 A प्रीतिसेवनयोः । to please, to like, to take delight in, to suffer, to enter, जुषते, Desid जुजोषिषते or जुजुषिषते, Deri. जुष्ट, जोषितुं, जोषित्वा or जुषित्वा.

झर्झ् (Set) 6 P. परिभाषणभर्त्सनयो. । to speak; to blame; to menace.

तिल् (Set) 6 P स्नेहे । to oil; to anoint. तिलति.

तुट् (कुटादि –Set) 6 P. कलहकर्माणि । to quarrel, to cut, तुटति.

तुड् (कुटादि —Set) 6 P. तोडने । to tear, to kill, तुडति.

तुण् (Set) 6 P. कौटिल्ये । to curve.

तुद् (तुदँ—Anit) 6 U व्यथने । to wound, to strike, to pain, to vex, तोत्तास्मि-हे, तोत्स्यति-ते, अतोत्स्यत्—त, अतौत्सीत्—अतुत्त, तुद्यासं, तुत्सीय, Deri. तुन्न, तुत्वा, तोत्तुं.

तुप्-तुंप् } Set } 6 P. हिंसायां । to kill
तुफ्-तुंफ् }

तृप्-तृंप् } Set } 6 P. प्रीणने । to please or to be pleased.
तृफ्-तृंफ् }

तृह } तृहू } Wet 6 P. हिंसायां । to kill, तर्हितास्मि—तर्ढास्मि, तृंहितास्मि—तृंढास्मि, Caus Aor. अततर्हत्—त अतीतृहत्-त,
तृंह } तृंहू } अततृंहत्-त, Deri तृढ, तर्हित्वा, तृंहित्वा, तृढ्वा, तर्हितुं, तर्ढुं, तृंहितुं, तृंढुं.

त्रुट् (कुटादि –Set) 6 P छेदने । to cut, to break.

त्वच् (Set) 6 P. संवरणे । to cover.

थुड् (कुटादि —Set) 6 P संवरणे । to cover.

दिश् (दिंश—Anit) 6 U अतिसर्जनेआज्ञापनेकथनेच । to give, to order, to tell, to show, to grant, देष्टास्मि-हे, देक्ष्यति-ते, आदिक्ष्यत्—त, अदिक्षत्-त, दिक्षीय, Deri दिष्ट, दिष्ट्वा, देष्टुं.

दृ (दृ—ङ्-Anit) 6 A आदरे । to honour; to care for; (mostly with आ), आद्रियते, आद्रियत, आद्रियतां, आद्रियेय, आदद्रे, आदर्ताहे, आदरिष्यते, आदरिष्यत, आदृत, आदृषीय, Pass. आद्रियते, Caus. आदरयति-ते, आदीदरत्-त, Desid आदिदरिषते, Deri आदृत. आदर्तुं, आदृत्य.

दृप् (Set) 6 P उत्क्लेशे । to give pain.

दृफ् (Set) 6 P. क्लेशे । to give pain.

दृभ् (दृभी–Set) 6 P. ग्रंथे । to string, to connect, (mostly with सं), Caus. Aor अदीदृभत्-त or अददर्भत्—त, Deri. दृब्ध, दर्भितुं, दर्भित्वा.

वृफ् (Set) 6 P उत्क्लेशे । to give pain

द्रुण् (Set) 6 P. गतिहिंसाकौटिल्येषु । to go, to kill; to make crooked.

धि (Amit) 6 P. धारणे । to hold; to possess. धेतास्मि, धेष्यति, अधैषीत्, धीयासं, Pass धीयते

धू (कुटादि -Set) 6 P विधूनने । to shake, to cause to tremble. धुवति, अधुवत्-धुवतु, धुवेयं, दुधाव, धुवितास्मि, धुविष्यति, अधुविष्यत्, अधुवीत्.

धृ (धृ—ङ्—Amit) 6 A. अवस्थाने । to be, to exist, ध्रियते, अध्रियत, ध्रियतां, ध्रियेय, दध्रे, धर्ताहे, धरिष्यते, अधरिष्यत, अधृत.

ध्रु (कुटादि —Amit) 6 P. गतिस्थैर्ययो । to go, to be fixed ध्रुवति.

ध्रुव् (Set) 6 P गतिस्थैर्ययो । to go; to stand firm.

निल् (णिल्-Set) 6 P गहने । to understand with difficulty, to become thick

नुद् (णुद्—Amit) 6 U प्रेरणे । to throw, to push, to urge on; to drive, to remove, to direct, नोत्तास्मि—हे, नोत्स्यति—ते, अनोत्स्यत्-त, अनौत्सीत्—अनुत्त, नुद्यासं-नुत्सीय, Deri नुत्त or नुन्न. नुत्त्वा, नोत्तुं.

नुद् (णुद्—Amit) 6 P प्रेरणे । to throw, कर्त्रभिप्रायेऽपिफले परस्मैपदार्थ· पुन पाठः (सिद्धांत कौमुदी). This root should be Parasmaipadi even when the fruit of the action refers to the agent

नू (णू—कुटादि —Set) 6 P. स्तुतौ । to praise, नुवति, अनुवत्, नुवतु, नुनाव, नुवितास्मि, नुविष्यति, अनुवीत्, नूयासं.

पि (Amit) 6 P गतौ । to go.

पिश् (Set) 6 P अवयवे—समूहस्यांशभावे-दीपनायांच । to form, to be reduced to constituent part; to light पिंशति, अपिंशत्-पिंशतु, Pass पिश्यते, Desid. पिपिशिषति, or पिपेशिषति, Deri. पिशित, पेशितुं, पिशित्वा or पेशित्वा.

पुट् (कुटादि —Set) 6 P संश्लेषणे । to embrace, to intertwine.

पुड् (कुटादि :-Set) 6 P. उत्सर्गे । to quit, to dismiss.

पुण् (Set) 6 P. शुभकर्मणि । to be pure or virtuous; to do a holy work.

पुर् (Set) 6 P अग्रगमने । to precede; to lead.

पुल् (Set) 6 P. महत्त्वे । to be great or large.

पृ (पृ–ङ्—Anit) 6 A. (always with व्या) व्यायामेव्यापारेच । to be busy or active, व्याप्रियते, व्यापर्ताहे, व्यापृत, व्यापृषीय, Pass. व्याप्रियते, Desid व्यापुपूर्षते

पृड् (Set) 6 P सुखने । to gladden

पृण् (Set) 6 P. प्रीणने । to please, to propitiate, Caus Aor अपपर्णत्–त or अपीपृणत्–त

प्रच्छ् (Anit) 6 P ज्ञीप्सायां । to ask, to seek; to desire; to know, (A with आ) पृच्छति–ते, अपृच्छत्–त, पृच्छतु–तां, पृच्छेयं–य, पप्रच्छ–पप्रच्छे, प्रष्टास्मि–हे, प्रक्ष्यति—ते, अप्रक्ष्यत्—त, अप्राक्षीत्—अप्रष्ट, पृच्छ्यासं–प्रक्षीय, Pass पृच्छ्यते, Deri. पृष्ट, पृष्ट्वा, प्रष्टुं.

बिल् (Set) 6 P. भेदने । to break

बुड् (कुटादि.–Set) 6 P. त्यागेसंवरणेच । to discharge, to cover

बृह् (बृह्—Wet) 6 P उद्यमने । to work, to labour बर्हितास्मि or बर्ढास्मि, बर्हिष्यति or भर्क्ष्यति, अबर्हिष्यत् or अभर्क्ष्यत्, अबर्हीत् or अभृक्षत्, Caus Aor अबबर्हत् or अबीबृहत्, Desid बिबर्हिषति or बिभृक्षति, Deri. बृढ, बर्हितुं or बर्ढुं, बर्हित्वा or बृढ्वा.

भुज् (भुजो–Anit) 6 P. कौटिल्ये । to bend, to curve, to be crooked भोक्तास्मि, भोक्ष्यति, अभोक्ष्यत्, अभौक्षीत्, Deri. भुग्न, भोक्तुं, भुक्त्वा.

भ्रस्ज् (भ्रस्जं—Anit) 6 U पाके । to fry, to roast, to parch. भृज्जति—ते, अभृज्जत्—त, भृज्जतु—तां, भृज्जेयं—य, बभ्रज्ज–बभर्ज, or बभ्रज्जे or बभर्जे, भ्रष्टास्मि—हे or भर्ष्टास्मि—हे, भ्रक्ष्यति—ते or भर्क्ष्यति—ते, अभ्रक्ष्यत्–त, or अभर्क्ष्यत्—त. अभ्राक्षीत् or अभार्क्षीत्–अभ्रष्ट, अभर्ष्ट, भृज्ज्यासं–भ्रक्षीय or भर्क्षीय, Pass भृज्ज्यते, Caus भ्रज्जयति—ते or भर्जयति–ते, Aor अबभ्रज्जत्–त or अबभर्जत्–त, Desid बिभ्रक्षति—ते or बिभर्क्षति–ते or बिभ्रज्जिषति–ते or बिभर्जिषति—ते. Deri. भृष्ट, भ्रष्टुं or भर्ष्टुं, भृष्ट्वा.

क्षुड् (कुटादि -Set) 6 P आच्छादने-संचये-निमज्जन इत्येके । to cover, to collect, to plunge.

मस्ज् (टु-मस्जो—Anit) 6 P. शुद्धौ । to sink down, to be immersed in water, to be disheartened, मज्जति, अमज्जत्, मज्जतु; मज्जेयं, ममज्ज, ममज्जिथ or ममंक्थ, मंक्तास्मि मंक्ष्यति अमंक्ष्यत्; अमांक्षीत्, मज्ज्यास्, Pass मज्ज्यते, Caus. मज्जयति-ते, अममज्जत्—त, Desid मिमंक्षति, Deri मग्न, मंक्तुं, मंक्त्वा, मज्जथु

मिच्छ्(Set) 6 P. उत्क्लेशे । to annoy, to hurt, to obstruct.

मिल् (मिलॅ—Set) 6 U. संगमे । to be united with, to meet, to join, to clash, to happen Desid मिमिलिषति—ते or मिमेलिषति—ते, Deri. मिलित, मेलितुं, मिलित्वा or मेलित्वा.

मिष् (Set) 6 P स्पर्धायां । to rival, to contend with, to look on or at.

मुच् (मुचॢँ—Anit) 6 U. मोक्षणे । to free, to liberate, to release, to loosen, to abandon, to grant, to except, to shed, to discharge to dismiss, to utter, to void, मुंचति-ते, अमुंचत्—त, मुंचतु—ता, मुंचेयं—य, मुमोच—मुमुचे, मोक्तास्मि—हे, मोक्ष्यति—ते, अमोक्ष्यत्—त; अमुचत्—अमुक्त, मुच्यासं—मुक्षीय, Pass. मुच्यते; Desid मुमुक्षति—ते or मोक्ष्यते, Deri. मुक्त, मोक्तुं, मुक्त्वा.

मुट् (Set) 6 P आक्षेप-मर्दन-बंधनेषु । to blame, to crush, to bind.

मुण् (Set) 6 P. प्रतिज्ञाने । to promise.

मुर् (Set) 6 P. संवेष्टने । to surround, to bind together, Bene. मूर्यासं

मृ (मृ-ङ्-Anit) 6 A. (but P. in all non-conjugational tenses except the Aorist and the Bene) प्राणत्यागे । to die, म्रियते, अम्रियत, म्रियतां, म्रियेय, ममार, मर्तास्मि, मरिष्यति, अमरिष्यत्, अमृत, मृषीय, Pass म्रियते Caus. मारयति—ते, अमीमरत्-त, Desid. मुमूर्षति Deri मृत, मर्तुं, मृत्वा.

मृड् (Set) 6 P. सुखने । to make happy, to rejoice.

मृण् (Set) 6 P. हिंसायां । to kill.

मृश् (Anit) 6 P आमर्शनेप्रणिधानेच । to touch, to consider, to reflect, Act मर्ष्टास्मि or म्रष्टास्मि, मर्क्ष्यति or म्रक्ष्यति, अमर्क्ष्यत् or अम्रक्ष्यत्, अमृक्षत् or अमार्क्षीत् or अम्राक्षीत्, Caus. Aor. अमीमृशत् –त or अममर्शत्–त, Desid. मिमृक्षति, Deri मृष्ट, मर्ष्टुं or म्रष्टुं, मृष्ट्वा.

रि (Anit) 6 P गतौ । to go, to move.

रिफ् } Set } 6 P कत्थने कथनेवा । युद्ध–निंदा–हिंसा–दानेषु । to boast,
रिह् } } to speak, to fight, to censure, to kill, to give.

रिश् (Anit) 6 P हिंसायां । to kill, रेष्टास्मि, रेक्ष्यति, अरेक्ष्यत्, अरिक्षत्, Deri. रिष्ट, रेष्टुं, रिष्ट्वा

रुज् (रुजो—Anit) 6 P भंगे । to break, to destroy; to bend, to pain, to injure, रोक्तास्मि, रोक्ष्यति, अरोक्ष्यत, अरौक्षीत्, Deri रुग्ण, रोक्तुं, रुक्त्वा

रुश् (Anit) हिंसायां । to kill, रोष्टास्मि, रोक्ष्यति, अरुक्ष्यत्, Deri. रुष्ट रुष्ट्वा; रोष्टुं.

लज् (ओलजी–Set) 6 A व्रीडने । to be ashamed, to be bashful Deri लग्न, लजितुं, लजित्वा.

लस्ज् (ओलस्जी—Set) 6 A व्रीडने । to be ashamed, to be bashful, लज्जते, अलज्जत, लज्जतां, लज्जेय, ललज्जे, लाज्जिताहे, लाज्जिष्यते, अलज्जिष्ट, लाज्जिषीय, Pass लज्ज्यते; Caus लज्जयति, Desid लिलज्जिषते, Deri लग्न or लाज्जित, लाज्जितुं, लाज्जित्वा.

लिख् (Set) 6 P. अक्षरविन्यासे । to write, to scratch, to draw, to touch, to peck Desid लिलिखिषति or लिलेखिषति; Deri. लिखित, लिखित्वा or लेखित्वा.

लिप् (लिप–Anit) 6 U. उपदेहे । to anoint, to besmear, to cover, to spread over, to stain, to pollute, लिंपति—ते, अलिंपत्—त, लिंपतु–ता, लिंपेयं–य, लिलेप–लिलिपे, लेप्तास्मि–हे, लेप्स्यति—ते; अलेप्स्यत–त, अलिपत्—त or अलिप्त; Deri. लिप्त, लेप्तुं, लिप्त्वा.

लिश् (Anit) 6 P. गतौ । to go, to move, लेष्टास्मि, लेक्ष्यति, अलेक्ष्यत, अलिक्षत्, Deri. लिष्ट, लेष्टुं, लिष्ट्वा.

लुट्, लुठ् { कुटादि—Set } 6 P. संश्लेषणे । to wallow, to roll about, to join.

लुप् (लुप्लृ–Anit) 6 U. छेदने । to cut, to break, to rob, to plunder, to seize, to suppress, लुंपति–ते, अलुंपत्–त, लुंपतु–तां, लुंपेयं-य, लुलोप—लुलुपे, लोप्तास्मि—हे, लोप्स्यति—ते, अलोप्स्यत्—त, अलुपत्–अलुप्त, Deri. लुप्त, लोप्तु, लुप्त्वा.

लुभ् (Set) 6 P विमोहने । to confound, to disturb, Deri. लुभित, लुभित्वा or लोभित्वा, लुब्ध्वा.

विच्छ्(Set) 6 P. गतौ । to go, to move, विच्छायति, अविच्छायत्, विच्छायतु, विच्छायेयं, विविच्छ or विच्छायांचकार, विच्छितास्मि or विच्छायितास्मि, विच्छिष्यति or विच्छायिष्यति, अविच्छायिष्यत् or अविच्छिष्यत्, अविच्छीत् or अविच्छायीत्, विच्छ्यासं or विच्छाय्यासं, Pass. विच्छ्यते or विच्छाय्यते, Caus. विच्छयति–ते or विच्छाययति–ते, Desid विविच्छिषति or विविच्छायिषति, Deri विच्छित or विच्छायित, विच्छितु or विच्छायितुं, विच्छित्वा or विच्छायित्वा.

विज् (ओविजी—Set) 6 A. भयचलनयो । to fear, to tremble (generally with उद्) P. P उद्विग्न.

विद् (विद्लृ—Anit but Set according to some) 6 U. लाभे । to get, to obtain, to find, to take in marriage, विंदति–ते, अविंदत्–त, विंदतु–तां, विंदेयं—य, विवेद–विविदे, वेत्तास्मि—हे or वेदितास्मि–हे, वेत्स्यति—ते or वेदिष्यति—ते, अवेत्स्यत्—त or अवेदिष्यत्—त, अविदत्–अवित्त or अवेदिष्ट, विद्यासं–वित्सीय or वेदिषीय, Desid विवित्सति–ते or विविदिषति–ते or विवेदिषति–ते, Deri वित्त or विन्न, वेत्तुं or वेदितुं, विदित्वा, वित्त्वा or वेदित्वा

विध् (Set) 6 P. विधाने । to pierce, Desid विविधिषति or विवेधिषति.

विल् (Set) 6 P. संवरणे । to cover, to conceal

विश् (Anit) 6 P प्रवेशने । to enter, (A after नि) वेष्टास्मि–हे, वेक्ष्यति—ते, अवेक्ष्यत्—त, अविक्षत्—त, Deri. विष्ट, वेष्टुं, विष्ट्वा.

वृण् (Set) 6 P. प्रीणने । to please, to gratify.

वृह् (वृहु—Wet) 6 P. उद्यमने । to work, to labour, (see वृह्).

व्यच् (Set) 6 P व्याजीकरणे । to deceive, to defraud, विचति, अविचत्, विचतु, विचेयं, विव्याच, अव्यचीत् or अव्याचीत्

व्रश्च् (ओव्रश्चू—Wet) 6 P. छेदने । to cut, to tear, to wound, वृश्चति, अवृश्चत्, वृश्चतु, वृश्चेय, वव्रश्च, व्रश्चितास्मि or व्रष्टास्मि, व्रश्चिष्यति or व्रक्ष्यति, अव्रश्चिष्यत् or अव्रक्ष्यत्, अव्रश्चीत् or अव्राक्षीत्, Deri वृक्ण, व्रश्चितुं or व्रष्टुं, व्रश्चित्वा.

व्रुड् (कुटादि.—Set) 6 P संवरणे । to cover, to heap.

शिल् (Set) 6 P. उंछे । to glean.

शद् (शद्लृ—Anit) 6 P शातने । to perish gradually (Forms are like those of शद् 1 P.)

शुन् (Set) 6 P गतौ । to go.

शुभ्, शुंभ् } Set } 6 P. शोभायां । to shine.

सद् (षद्लृ—Anit) 6 P विशरणगत्यवसादनेषु । to divide, to break, to go, to wither, to despond, to be weary, (forms are like those of सद् 1 P)

सिच् (षिचँ—Anit) 6 U क्षरणे । to sprinkle to moisten, to scatter, सिचति-ते, असिचत्—त, सिचतु—तां, सिचेयं—य, सिषेच—सिषिचे, सेक्तास्मि-हे, सेक्ष्यति-ते, असेक्ष्यत्—त, असिचत्—त or असिक्त, Deri सिक्त, सेक्तुं, सिक्त्वा.

सिल् (षिल्–Set) 6 P उंछे । to glean.

सुभ् (षुभ्–Set) 6 P भाषाहिंसयो । to speak, to kill.

सुर् (षुर्—Set) 6 P. ऐश्वर्यदीप्त्यो । to rule, to shine

सू (षू—Set) 6 P प्रेरणे. । to impel, to drive, to discharge, to remit, सुवति, असुवत्, सुवतु, सुषाव, सवितास्मि-सविष्यति, असावीत्, Deri सूत, सवितु, सूत्वा

सृज् (Anit) 6 P. विसर्गे । to leave, to create, to let loose, to let off, to throw, to produce, to put on, स्रष्टास्मि, स्रक्ष्यति, अस्रक्ष्यत; अस्राक्षीत्, Deri. सृष्ट, स्रष्टुं, सृष्ट्वा

स्तृह् (श्टृहू–Wet) 6 P. हिंसायां । to kill, to hurt, to strike, स्तर्हितास्मि or स्तर्ढास्मि, स्तर्हिष्यति or स्तर्क्ष्यति, अस्तर्हीत् or अस्तृक्षत्; Desid तिस्तर्हिषति or तिस्तृक्षति, Deri स्तृढ, स्तर्हितु or स्तर्ढुं; स्तर्हित्वा or स्तृढ्वा.

स्थुड् (कुटादि.–Set) 6 P. संवरणे । to cover, to hide.

स्पृश् (Anit) 6 P. संस्पर्शने । to touch, to cling to, to act upon; to affect, to accept, to reach, to wash, स्प्रष्टास्मि or स्पर्ष्टास्मि, स्प्रक्ष्यति or स्पर्क्ष्यति, अस्प्रक्ष्यत् or अस्पर्क्ष्यत्, अस्पृक्षत् or अस्प्राक्षीत् or अस्पार्क्षीत्, Caus. Aor अपिस्पृशत्–त or अपस्पर्शत्–त, Desid पिस्पृक्षति, Deri. स्पृष्ट, स्प्रष्टुं or स्पर्ष्टुं, स्पृष्ट्वा

स्फर् (कुटादि –Set) 6 P. संचलने । to tremble, to move.

स्फुट् (कुटादि –Set) 6 P विकसने । to blow, to blossom, to break.

स्फुड् (कुटादि –Set) 6 P. संवरणे । to cover

स्फुर् (कुटादि –Set) 6 P. स्फुरणे । to throb, to palpitate, to become agitated, to start, to appear clearly, to flash, Caus स्फारयति–ते or स्फोरयति–ते, Aor. अपुस्फरत्—त or अपुस्फुरत्—त.

स्फुल् (कुटादि —Set) 6 P. सचलने । to tremble, to throb.

हल्, हिल् } Set } 6 P. भावकरणे । to express amorous inclinations.

हुड् (Set) 6 P संघाते । to collect.

॥ अथ श्नम्–विकरणो रुधादिगणः सप्तमः ॥

अंज् (अंजू—Wet) 7 P व्यक्ति—म्रक्षण—कांति–गतिषु । to make clear, to anoint, to be beautiful, to go, अनक्ति, आनक्–ग्, अनक्तु, अंज्यां, आनंज, अंजितास्मि or अंक्तास्मि, आंजिष्यति or अंक्ष्यति, आंजिष्यत् or आंक्ष्यत्, आंजीत्, अज्यासं, Pass अज्यते, Deri. अक्त, अंजितुं or अंक्तुं, अंजित्वा or अंक्त्वा or अक्त्वा.

इंधी (ञि—इन्धी—Set) 7 A. दीप्तौ । to shine, to kindle, इंद्धे, ऐंद्ध, इंद्धाम्, इंधीय, इंधांचक्रे, इंधिताहे, इंधिष्यते, ऐंधिष्यत, ऐंधिष्ट Pass. इध्यते, P P. इद्ध.

उन्द् (उंदी—Set) 7 P. क्लेदने । to moisten, उनत्ति, औनत्, उनत्तु, उंद्यां, उंदांचकार, उंदितास्मि, उंदिष्यति, औंदीत्, उद्यासं. Pass. उद्यते, P P उत्त or उन्न.

कृंत् (कृती—Set) 7 P वेष्टने । to surround, कृणत्ति

क्षुद् (क्षुदिर्—Anit) 7 U संपेषणे । to pound, to crush, क्षुणत्ति—क्षुंत्ते, अक्षुणत्—अक्षुंत्त, क्षुणत्तु—क्षुंत्तां, क्षुद्या—क्षुंदीय, चुक्षोद—चुक्षुदे, क्षोत्तास्मि—हे, क्षोत्स्यति—ते, अक्षोत्स्यत्—त, अक्षुदत्—अक्षौत्सीत्—अक्षुत्त, Deri क्षुण्ण, क्षोत्तुं, क्षुत्त्वा.

खिद् (खिद्-Anit) 7 A. दैन्ये । to be displeased or distressed, खिंत्ते, अखिंदि, खिंत्तां, खिंदीय.

छिद् (छिदिर्-Anit) 7 U द्वैधीकरणे । to cut, to interrupt, to destroy, छिनत्ति—छिंत्ते, अच्छिनत्—अच्छिंत्त, छिनत्तु—छिंत्तां, छिद्यां—छिंदीय, चिच्छेद—चिच्छिदे, छेत्तास्मि—हे, छेत्स्यति—ते, अच्छेत्स्यत्—त, अच्छिदत् or अच्छैत्सीत्—अच्छित्त, Deri छिन्न, छेत्तुं, छित्त्वा.

छृद् (उ-छृदिर्—Set) 7 U दीप्तिदेवनयोः । to shine, to play, छृणत्ति, छृंत्ते, छर्दिष्यति—ते or छर्त्स्यति—ते, छृद्यासं, छर्दिषीय or छृत्सीय, Caus Aor अचिच्छृदत् or अचच्छर्दत्—त, Desid चिच्छर्दिषति—ते or चिच्छृत्सति—ते, Deri छृन्न, छर्दितुं, छर्दित्वा or छृत्त्वा.

तञ्च् { तंचू—Wet } 7 P संकोचने । to contract, to shrink, तनक्ति,
तंज् { तंजू—Wet } तंचितास्मि, तंजितास्मि, तंक्तास्मि, तच्यासं, तज्यासं, Pass तच्यते, तज्यते, Deri तक्त, तंजित्वा, तंचित्वा, तक्त्वा, तंक्त्वा.

तृद् (उ—तृदिर्—Set) 7 U. हिंसानादरयोः । to kill, to disregard, तृणत्ति—तृंत्ते, तर्दितास्मि—हे, तर्दिष्यति—ते, तर्त्स्यति—ते, अतर्दीत्—अतृदत्, अतर्दिष्ट, तृद्यासं—तर्दिषीय, तृत्सीय, Caus Aor. अततर्दत्—त or अतीतृदत्—त, Desid तितर्दिषति—ते or तितृत्सति—ते Deri. तृण्ण, तर्दितुं, तर्दित्वा or तृत्त्वा.

तृह् (Set) 7 P हिंसायां । to kill, तृणेढि

पिष् (पिष्लृ—Anit) 7 P संचूर्णने । to grind, to pound, to crush. पिनष्टि, अपिनट्-ड्, पिनष्टु, पिंष्ड्ढि, पिष्यात्, पेष्टास्मि, पेक्ष्यति, अपेक्ष्यत्, अपिषत्, Deri पिष्ट, पेष्टुं, पिष्ट्वा.

पृच् (पृची-Set) 7 P संपर्के । to touch, to bring into contact with, to unite, to satiate, to increase, पृणक्ति, अपृणक्, पृणक्तु, पृंच्यां, पपर्च. Deri पृक्त, पर्चितुं, पर्चित्वा.

भंज् (भंजो—Anit) 7 P. आमर्दने । to break, to split, to interrupt, to frustrate, to disappoint, भनक्ति, अभनक्, भनक्तु, भंज्यां, बभंज, भंक्तास्मि, भक्ष्यति, अभंक्ष्यत्, अभाक्षीत्, भज्यासं, Pass. भज्यते, Desid बिभंक्षति, Deri. भग्न, भंक्तुं, भंक्त्वा or भक्त्वा.

भिद् (भिदिर्—Anit) 7 U विदारणे । to break, to cut asunder, to transgress, to divide, to open, to cause to expand, to change, to perplex, to distinguish, to disturb, to betray, to set at variance, भिनत्ति-भिंत्ते, अभिनत्-अभिंत्त, भिनत्तु-भिंत्तां, भिद्या—भिंदीय, बिभेद—बिभिदे, भेत्तास्मि-हे, भेत्स्यति-ते, अभेत्स्यत्-त, अभिदत् or अभैत्सीत्-अभित्त, Deri. भिन्न or भित्तं (a fragment), भेत्तुं, भित्त्वा.

भुज् (Anit) 7 P. पालने । to protect, to govern, to rule, [A. अनवने । to eat, to enjoy, to endure, to pass (as time)] भुनक्ति-भुंक्ते, अभुनक्-अभुंक्त, भुनक्तु-भुंक्तां, भुंज्यां—भुंजीय, बुभोज-बुभुजे, भोक्तास्मि-हे, भोक्ष्यति-ते, अभोक्ष्यत्—त, अभौक्षीत्—अभुक्त, Caus. भोजयति-ते, (but भोजयति only in the sense of eating), Deri. भुक्त, भोज्य or भोग्य, भोक्तुं, भुक्त्वा.

युज् (युजिर्—Anit) 7 U योगे । to join, to unite, to apply, to use, to meditate, to concentrate the mind, to prepare, to grant, to intend, (A after a preposition ending in a vowel), युनक्ति-युंक्ते, अयुनक्—अयुंक्त, युनक्तु—युंक्तां, युंज्यां—युंजीय, युयोज-युयुजे, योक्तास्मि—हे, योक्ष्यति—ते, अयोक्ष्यत्—त, अयुजत् or अयौक्षीत्—अयुक्त.

रिच् (रिचिँर्—Anit) 7 U विरेचने । to purge, to empty, to evacuate, रिणक्ति-रिंक्ते, अरिणक्-अरिक्त, रिणक्तु-रिक्तां, रिच्यां-रिंचीय, रिरेच—रिरिचे, रेक्तास्मि-हे, रेक्ष्यति-ते, अरेक्ष्यत्-त, अरिचत् or अरैक्षीत्-अरिक्त, Deri रिक्त, रेक्तु, रिक्त्वा.

रुध् (रुधिँर्-Anit) 7 U आवरणे । to oppose, to obstruct, to besiege, to enclose, to obscure, to harass, रुणद्धि—रुंद्धे; अरुणत्-अरुंद्ध; रुणद्धु —रुद्धा, रुंध्यां—रुधीय, रुरोध—रुरुधे, रोद्धास्मि—हे; रोत्स्यति-ते, अरोत्स्यत्—त, अरुधत् or अरौत्सीत्—अरुद्ध, Desid. रुरुत्सति-ते, Deri रुद्ध, रोद्धुं, रुद्ध्वा.

विच् (विचिँर्—Anit) 7 U. पृथग्भावे । to divide, to separate, to discern, to remove from, विनक्ति—विंक्ते, अविनक्-अविक्त, विनक्तु-विक्तां, विंच्यां-विचीय, विवेच—विविचे, वेक्तास्मि-हे, वेक्ष्यति-ते, अवेक्ष्यत्-त, अविचत् or अवैक्षीत्—अविक्त, Desid विविक्षति-ते; Deri. विक्त, वेक्तु, विक्त्वा.

विज् (ओ—विजी-Set) 7 P भय-चलनयोः । to fear, to tremble, to be disgusted, विनक्ति, अविनक्, विनक्तु, विंज्यां, विवेज, विजितास्मि, P P. विग्न.

विद् (विद्-Anit) 7 A विचारणे । to discuss, to reason upon, to consider, to understand, विंत्ते, अविंदत, वित्तां, विदीय, Deri. विन्न or वित्त, वेत्तुं, वित्त्वा, (other forms are like those of विद् 4 A).

वृच् (वृची-Set) 7 P. वर्जने । to abandon, to exclude, वृणक्ति, P P. वृक्त.

वृज् (वृजी-Set) 7 P वर्जने । to avoid, P P वृक्त

शिष् (शिष्लृ—Anit) 7 P विशेषणे । to distinguish, to leave as a remainder, शिनष्टि, अशिनट्, शिनष्टु; शिंष्यां, शिशेष, शेष्टास्मि, शेक्ष्यति, अशेक्ष्यत्, अशिषत्, Desid शिशिक्षति, Deri शिष्ट, शेष्टुं, शिष्ट्वा.

हिंस् (हिसि-Set) 7 P हिंसायाम् । to kill हिनस्ति; अहिनत्; हिनस्तु, हिंस्यां; जिहिंस, Pass. हिंस्यते.

॥ अथ उ–विकरणस्तनादिगणोऽष्टमः ॥



ऋण् (ऋणु—Set) 8 U गतौ । to go, ऋणोति-ऋणुते or *अर्णोति; अर्णुते, आर्णोत्—आर्णुत, ऋणोतु—ऋणुता or अर्णोतु—अर्णुतां; ऋणुयां-ऋण्वीय or अर्णुयां—अर्णुवीय आनर्ण—आनृणे, अर्णितास्मि —हे, अर्णिष्यति—ते, आर्णीत्-आर्णिष्ट or आर्त, ऋण्यासं-अर्णिषीय; Pass ऋण्यते, Caus अर्णयति-ते; Desid. अर्णिनिषति—ते, Deri· ऋत, अर्णितुं, अर्णित्वा or ऋत्वा.

कृ (डु—कृं—ञ्–Anit) 8 U करणे । to do, to make, करोति—कुरुते, अकरोत्—अकुरुत, करोतु-कुरुतां, कुर्यां-कुर्वीय, चकार—चक्रे, कर्तास्मि-हे, करिष्यति-ते, अकरिष्यत्-त, अकार्षीत्-अकृत, क्रियासं-कृषीय, Pass क्रियते, Caus कारयति-ते, Aor अचीकरत्-त; Desid. चिकीर्षति—ते, Deri कृत, कर्तुं, कृत्वा.

